Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

MIMAMSA PARIBHASHA PARISHKARA

A Commentary

ON

MIMAMSA PARIBHASHA.

BY

D. T. TATACHARYA SIROMANI,

Chief Professor of Mimamsa,

SANSKRIT COLLEGE,

TIRUVADI, TANJORE.

Madras Presidency.

Printed by R. GURURAJACHARIAR,

SRI GOPALA VILASA PRESS,

KUMBAKONAM.

Price 1-4-0] **1919.** [Postage free for students.

Digitization by Arya Samaj Charitable Foundation, Chennai

Apply to.—

TANTRODYANAM,

Tiruvadi, Tanjore.



Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

मीमांसापरिभाषाया व्याख्यानं

मीमांसापरिभाषापरिष्कारः ।

श्रीपञ्चनदसंस्कृतमहाकलाशालायां
प्रधानमीमांसकेन
श्रीशैलताताचार्यशिरोमणिना
विरचितः ।

अयं
तेनैव कुम्भघोणे
रा. गुरुराजाचार्यस्य,
"श्रीगोपालविलास" मुद्रालये
मुद्रितः ।
पञ्चनदक्षेत्रे प्रकाशितश्च ।

1919.

239

विद्यार्थिनां

मूल्यम् 1—4—0]

[न पृथक् प्रेषणव्ययः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

'तन्त्रोद्यानं, तिरुवादी, तञ्जावूर्.'

इति अपेक्षमाणैर्लेखनीयम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

FOREWORD.

By

M. R, Ry S. Kuppuswami Sastri, M. A., F. M. U.
Professor of Sanskrit and Comparative
Philology, Presidency College, and Curator,
Government Oriental Manuscript Library, Madras.

श्रूयते किल 'शूर्पेण जुहोती' ति । कुलेखकः कश्चन शूर्पं सूर्याचकार । माणवकश्च सूर्येण जुहोतीति पपाठ । अध्यापकश्च नैयायिकः सूर्यस्य होमसाधनत्वं ब्रुवन्, कथमाकाशस्थस्य तद्घटेतेति पर्यनुयुक्तः सोमं निदर्शनीचकार । अपरश्च तार्किकपरिवृढः 'पूषानुमन्त्रणमन्त्रस्य प्रकरणादुत्कर्षः' इति ग्रन्थमन्तेवासिभ्यो विवृण्वन्नुत्कर्षं श्रेयस्त्वपरं मत्वा तथैतत्परिष्करणेन नैजमनुगमकौशलं प्राचीकशत् । अत्राद्यस्य विदुषो वंशे जातेन केनचिद्व्याख्यातृमहाशयेन मीमांसापरिभाषायाः, अपरेण केनचिद्द्वितीयवंशजेन मीमांसान्यायप्रकाशस्य च, विरचिते व्याख्याने कालिघट्ट (कलकत्ता) नगरे, मुद्रणव्ययं पत्रदुर्भिक्षञ्चाविगणय्यैव श्रद्धालुभिः कैश्चिन्मुद्रापिते, अपव्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

ख्यानघण्टापथजयस्तम्भौ, अधिगतमीमांसाशास्त्राणां मस्तिष्कं व्याकोपयती, तत्र तत्र विद्याशालासु विद्यार्थिहस्तेषु च नृत्यत इति निनरां विषीदामः ॥

अद्यत्वे पुनः ब्रह्मश्री-पण्डित तिरुमलताताचार्येण न्यायमीमांसाशिरोमणिना पञ्चनदक्षेत्रे संस्कृतकलाशालायां मीमांसाप्रधानाध्यापकपदमधितिष्ठता. अस्मत्सकाशादधिगतमीमांसामीमांसनशक्तिविशेषेण सङ्कलितं, मीमांसापरिभाषार्थं परिष्कुर्वन्मीमांसापरिभाषापरिष्काराभिधं व्याख्यानं दृष्टिपथं यावदारोहति, तावत्प्रसीदत्यस्मदन्तरङ्गम्; सत्सम्प्रदायसम्प्रतिपन्नां रीतिमनुरुध्य भावपुष्ट्या अन्यूनानतिरिक्तया सन्दर्भशैल्या सुनिपुणं विषयविवेचनेन च मीमांसाविद्यार्थिलोकस्य कल्पेत समीचीनाय संस्काराय, अनल्पायोपकाराय च इत्यनुमोदनवचनैर्मुखरयति चास्मान् ॥

मीमांसापरिभाषापरिष्कर्त्रैव समुचितां रीतिमवलम्ब्य अचिरेण करिष्यमाणा आपदेवीयन्यायप्रकाशप्रकाशिकाऽपि विद्यार्थिलोकस्योपक्रियादित्याशास्यते ॥

S. KUPPUSWAMI SASTRI,
3rd July 1919.

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

I am glad I was given an opportunity to have a running review of the learned commentary of Brimha Sri D. Tirumalai Tatachariar, Mimamsa Professor of this institution, on the Mimamsa Paribhasha of Krishna yajvan. The original being a very concise introduction to the vast field of Mimamsa Philosophy the present commentary supplies a rational & necessary demand, for beginners in that department of learning. In the present task undertaken by the commentater, he has done very good justice to the subject and has rendered a really valuable service to a widespread Knowledge of this Philosophy of Mimamsa in the most correct and traditional form. Such a commentary as this has, Iam glad, become quite indispensible & very opportune, as it acts as a safe guard of this system of learning that has suffered so much at the hands of some of the recent commentators. I can also testify to the great usefulness of tnis work as the commentater has spared no pains in the matter of quoting Vishaya Vakyas and other passages of reference that are absolutely necessary for a complete and correct understanding of the subject from such a concise work as the Paribhasha. His

Digitization by Arya Samaj Charitable Foundation, Chennai

elucidation of difficult & disputed passages is to the point and very convincing. The style of this commentary throughout is simple enough and is free from any unnecessary display of discusions. It is very admirable that this Pandit has given out to the public of oriental learning sucn a work excellent in every way and in conclusion I am tempted to quote, with reference to this commentary also, the famous words of the veteran commentator :—

' नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते '

TIRUVADI,
6—3—1919.

S. VEDANTA AIYANGAR, M.A., L.T.
Principal, Sanskrit College,
TIRUVADI.

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

आस्थाय पञ्चनददिव्यविभूषणं यद्
विद्यानिकेतनमभूदयमक्षरज्ञः ।
श्रीशैलतातयशिरोमणिरादरेण
तस्मै निबन्धममुमर्पयति स्म धन्यः ॥

अचिरात्प्रकटयिष्यमाणे मामकीने 'मीमांसोपन्यासे' यथाशक्ति, सामान्यतो विशेषतो वा मीमांसां प्रति वक्तव्यमुक्त्वा नाद्यत्वे पुनस्तत्र व्यापरितुमावश्यकतां पश्यामि । मीमांसापरिभाषायां पङ्क्तीनां विषय-प्रतिपादनस्य वाऽविशदतास्वाभाव्येन समुदितां विवरणापेक्षां चिरम-वधाय, तत्र भवतामस्मन्मीमांसागुरूणां प्रीतये शिष्यजनेन कर्तव्यं, यथा किञ्चिन्निबन्धनेन न तथा प्रकारान्तरेण सम्पत्स्यत इति निश्चित्य, तथा मीमांसायां व्युत्पित्सूनामुपकारलवोऽपि वाऽऽहितः स्यादिति सम्भाव्य, विवरणेऽस्मिन्नस्मि प्रवृत्तः । यदाऽहमेतत्प्रयोजनं प्रति संशयान आसं तदा यदृच्छया काळिघट्टतस्समागतं जैमिनेः पूर्वपक्षं

Digitization by Arya Samaj Charitable Foundation, Chennai

सिद्धान्तीकृत्य सिद्धान्तं पूर्वपक्षयित्वा प्रवृत्तमेकमपव्याख्यानं प्रयासस्य मे प्रयोजनवत्तामादर्शयत् वैयाकुलीं मम निरस्यति स्म । सम्यगिदं मे विदितं यन्मदीया शैली प्रायेण व्युत्पित्सूनां विनाऽध्यापकानुग्रहं स्वतो दुरवगाहेति । तथाऽपि विस्तरादधिकतरात् बिभ्यन्नाहन्तदन्यथाभावे यत्नमकार्षम् । नेतो मन्तव्यमावश्यककथनमुपोक्षितामिति । शास्त्रान्तरसंस्तववद्भ्यो यथा रोचेत तथा तत्र तत्र लक्षणादिनिष्कर्षेऽपि किञ्चित्प्रवृत्तम् । यद्यपि तत्र विमृशतां आक्षेपा उपर्युपरि उदित्वरा भवेयुरिति न मे न भातं। तथाऽपि तादृशः कोलाहलः प्रवृत्तिप्रयोजनमुपरुन्ध्यादिति न तत्र दूरं गतम् । अधिकमवधानमादधतोऽपि 'परिलिखतः किञ्चिदपि प्रकृतिर्भवति प्रमाद इति ' संविदानो जनोऽयं प्रवृत्तिरेषा विदुषां कीदृशमभिप्रायमाकलयिष्यतीति सकुतुकं प्रतीक्षते ॥

अन्ततः, अकृतकार्योऽहं भवेयं, यदि, महता स्वीयत्वाभिमानेन तथाऽल्पेतरेणादरेण एतन्मुद्रणकार्यनिर्वर्तितवद्भ्यः श्री गोपालविलासमुद्रालयस्य प्रभवद्भ्यः श्रीगुरुराजाचार्येभ्यः प्रणामानुसारिणीं मे कृतज्ञतां न प्रकाशयेयम् ॥

संस्कृतमहाविद्याशाला
पञ्चनदम् । तञ्जापुरम् ।
मद्रराजधानी । 1-3-19.

प्रबन्धा.

Digitization by Arya Samaj Charitable Foundation, Chennai

॥ श्रीः ॥

॥ श्रीरङ्गराजपरब्रह्मणे नमः ॥

अथ

मीमांसापरिभाषापरिष्कारः ।

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥१॥
बालानां शास्त्रसिद्धार्थाक्लेशबोधाय धीमताम् ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥२॥

॥ श्रीः ॥

वेदात्मना विहङ्गेन बद्धाञ्जलि पणायितम् ।
अधिपेण्णानदीतीरं धाम तन्मे प्रसीदतु ॥

श्रीमच्छास्त्रिमहाशयदयाकणो जयति यत्प्रभावेन ।
वस्त्विति विलोकनीयो विदुषामयमपि जनो जगति जातः ॥

प्राच्यनव्यनयतन्त्रसंस्तवात्सेवया च सुधियां स्फुरन्मतिः ।
एष तातयशिरोमणिस्सतां तोषमावहति तन्त्रवेदिनां ॥

ननु धीमन्तः स्वयमक्लेशेन भोत्स्यन्ते, तदाह– बालानामिति ॥ अपरिचितेदंशास्त्रा ये एतदधिजिगांसवो ग्रहणधारणयोः प्रगल्भन्ते

Digitization by Arya Samaj Charitable Foundation, Chennai

इह खलु महर्षिजैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायां धर्माधर्मावेवानुष्ठानोपयोगितया-विचारितौ । तत्र वेदबोधितेष्ट साधनताको धर्मः । यथा यागादिः । वेदबोधितानिष्टसा-

---

तेऽत्राधिकारिणइति ॥ धीमतेति केचित्पठंति ॥ इहेति ॥ अव्ययसमुदायोऽयमिह खल्विति वाक्योपक्रमे । यद्वा इहेति द्वादशलक्षण्यामन्वेति ॥ कृतज्ञतामनुसन्दधानः शास्त्रकारनाम कीर्तयति । महर्षीति ॥ लक्षणम् अध्यायः ॥ पूर्वमीमांसायाम् तदन्तर्गतायामित्यर्थः । सङ्कर्षस्यापि पूर्वमीमांसात्वात् ॥ धर्मेति ॥ अस्य प्राधान्येनान्यस्य च तदपवादत्वेन विचारो बोध्यः । अतो न शास्त्रस्यानेकविषयत्वम् । उभयोरपि प्राधान्येनैव । वेदार्थत्वावच्छिन्नस्यैव विषयत्वात् । अत एव प्रथमसूत्रेऽकारप्रश्लेषोऽपीति तु परे । एवेति धर्माधर्मयोः प्राधान्येन निरूपणं सूचयितुम् । औपनिषदार्थविचारव्यवच्छेदफलकं वा । समानेऽपि वेदार्थत्वे तस्येहाविचार्यत्वात् ॥ अनुष्ठानेति ॥ सकलसंशयसमुन्मूलनेन यथा तौ सम्यगनुष्ठानोपयुक्तौ स्यातान्तथेत्यर्थः ॥ तदेवमनेन वाक्येन, धर्माधर्मात्मको मीमांसाशास्त्रविषयोऽर्थः स्वप्रतिपिपादयिषितसमस्तपदार्थपरमोद्देश्यभूत इत्यवबोधयन् प्रबन्धमात्मीयमवतारयाम्बभूव ॥ तत्र धर्माधर्मयोर्मध्ये ॥ वेदेति स्मृत्याचारयोरप्युपलक्षणम् । अन्यथा तयोश्चेत्युत्तरग्रन्थासङ्गतेः । अथवा वेदबोधितेति वेदप्रयोज्यबोधविषयेत्यर्थकम् । तेन नोक्तानुपपत्तिः । तयोरपि वेदैकमूलकत्वेन तज्जन्यबोधस्यापि तत्प्रयोज्यत्वाक्षतेः । न वा इष्टसाधनतायास्साक्षाद्वेदाबोध्यत्वेऽप्यसम्भवः ॥ श्येनेऽपि लक्षणगमनमिष्टमेव ॥ यागेति ॥ आदिना दानहोमवत् विहितन्द्रव्यमपि गृह्यते । एवमुत्तरत्र निषिद्धं

Digitization by Arya Samaj Charitable Foundation, Chennai

धनताकोऽधर्मः। यथा कलञ्जभक्षणादिः । तयोश्च वेदः स्मृतिराचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रप्रमाणम् । वेदमूलकत्वेन स्मृतेः प्रामाण्यम् । आचारस्य तु वेदस्मृत्युभयमूलकत्वेन । स च वेदो द्विविधः— मन्त्ररूपो ब्राह्मणरूपश्चेति । तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते । प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः ।

द्रव्यमपि ॥ स्वतंत्रेति ॥ न तावदत्रान्यानपेक्षं प्रमापकत्वं स्वातंत्र्यं। स्वज्ञानमपेक्ष्यैव वेदस्यापि तथात्वात् । नापि प्रमाणान्तरानपेक्षन्तत्। श्रवणस्यापेक्षणात् । नापि पुरुषाधीनगुम्भनकत्वाभावः । अशब्दस्याचारस्यापि तथात्वापत्तेः । नापि पुरुषानधीनानुपूर्वीकत्वम् । तस्य शब्दगतनित्यत्वे पर्यवसानात् तस्य च शब्दगतस्वातन्त्र्ये हेतुत्वेन तदनात्मकत्वात् । अतः स्वेतरप्रमाणागोचरपदार्थप्रमापकत्वं स्वेतरशब्दानपेक्षं प्रमापकत्वं वा प्रकृते स्वातंत्र्यमिति बोध्यम् ॥ वेदेति ॥ दृढकर्तृस्मरणेन, असर्वज्ञानां तत्कर्तृणामलौकिकेऽर्थे प्रमाणान्तरमुखनिरीक्षणावश्यम्भावेन च न पूर्ववत् स्वातन्त्र्यमिति ॥ उभयेति ॥ स्वातन्त्र्यविरहिण आचारप्रमाणस्य न स्मृतिमात्रमूलकत्वम् । तस्या अप्यस्वातन्त्र्यात् । नापि साक्षाद्वेदमूलकत्वम् । इदानीमाचरितुर्मूलभूतवेदोपलम्भे सामर्थ्याभावेन यः तत्समर्थस्तादृशाचारप्रवर्तकः तदीयतादृशवेदार्थस्मृतेरवश्यमंगीकर्तव्यत्वादिति भावः ॥ वक्ष्यत इति ॥ विध्युपजीवितया मन्त्रोपयोगस्य विधिघटितब्राह्मणनिरूपणानन्तरमेव तन्निरूपणस्यावसरइति भावः ॥ तर्हि ब्राह्मणरूपो मन्त्ररूपश्चेति विभागक्रमस्समुचितइति चेन्न । ब्राह्मणलक्षणं मन्त्रघटितमि

Digitization by Arya Samaj Charitable Foundation, Chennai

विधायकं वाक्यं ब्राह्मणम् । ब्राह्मणशेषश्चार्थवादः । तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति च वक्ष्यते ।

तच्चानेकविधम् । कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्, फलाय गुणवाक्यम्, सगुणकर्मोत्पत्तिवाक्य-

---

ज्ञापयितुं क्रमान्तराश्रयणात् । मन्त्रपदवाच्यत्वेनाभियुक्तप्रसिद्धिविषयत्वरूपमन्त्रत्वावच्छिन्नभिन्नवेदत्वं हि ब्राह्मणत्वमिति ॥ अत एव 'विधायकं वाक्य' मिति न ब्राह्मणलक्षणम् । अर्थवादस्य तृतीयविधात्वप्रसंगेनोक्तद्वैविध्यभंगापत्तेः । विधायकमन्त्रविशेषेऽतिप्रसङ्गाच्च ॥ अत एव च 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' 'कर्मचोदना ब्राह्मणानि' 'ब्राह्मणशेषोऽर्थवाद' इत्यापस्तंबोक्तिरपि विध्यर्थवादस्वरूपपरिचायनमात्रपरा । अन्यथा विधिवाक्यघटकपदानामिवार्थवादस्यापि विध्यन्तर्भूतत्वेन द्वैविध्यभङ्गविरहेऽपि मन्त्रविशेषेऽतिप्रसङ्गस्य दुर्वारत्वापत्तेरिति ॥ **ब्राह्मणशेषइति** ॥ विधिवाक्यात्मकब्राह्मणशेषोऽर्थवादात्मकं ब्राह्मणमित्यर्थः ॥ अनेन वाक्यद्वयेन ब्राह्मणं द्विविधं विध्यर्थवादभेदादिति विभागोऽभिसंहितः । प्रवर्तनानिवर्तनान्यतरबोधकं वाक्यं विधिः । तद्भिन्नोऽर्थवादः ॥

तच्च विधिवाक्यञ्च ॥ **कर्मोत्पत्तीति** । तन्मात्रेत्यर्थः । एवमुत्तरत्राऽपि विना फलाय गुणवाक्यम् ॥ **उत्पत्तिः** स्वरूपबोधनम् ॥ **गुणेति** । गुणविधायकं वाक्यं गुणवाक्यम् ॥ **फलेति** । तत्सम्बन्धबोधकं वाक्यमित्यर्थः ॥ **फलायेति** । नन्वत्र को गुणः— नतावद्गुणत्वजात्यवच्छिन्नः । दध्यादेरतथात्वात् । नाप्यप्रधानभूतः । फलं प्रति

Digitization by Arya Samaj Charitable Foundation, Chennai

मित्यादिभेदात् । तत्र येन वाक्येनेदं कर्म कर्त्तव्यमिति बोध्यते, तत् कर्मोत्पत्तिवाक्यम् । यथा 'अग्निहोत्रं जुहोती' ति । अत्राग्निहोत्रहोमः कर्तव्यतया विधीयत इति कर्मोत्पत्तिवाक्यम् । विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यम् । यथा 'दध्ना जुहोती' ति गुणवाक्यमिदम् । कर्मा-

---

कर्मणोऽप्रधानतया फलवाक्येऽतिव्याप्त्यापत्तेः । उच्यते । क्रियाभिन्नः प्रकृते गुणः । एवमपि गुणवाक्येऽतिव्याप्तिः, होमादिरूपफलाय गुणविधानात्, यदुद्दिश्य प्रवृत्तिः तदेव हि फलम् । कार्यांतरसाधनत्वासमानाधिकरणसाध्यत्वावच्छिन्नं फलमिति तु इन्द्रियपशुवृष्ट्यादीनां फलत्वानापत्तेरसम्भवि । मैवम् । कामशब्दघटितपदबोध्यत्वं प्रकृते फलत्वमिति दिशा फलपदार्थस्य निर्वचनीयत्वादिति॥ **इत्यादीति** । आदिना कर्मफलोभयबोधकं गुणकर्मफलत्रितयबोधकञ्च वाक्यं परिगृह्यते ॥ **यथाग्नीति** । इदमत्र बोध्यम्– वाक्यादस्मादग्निहोत्रहोमकरणिका भावना विधिविषय इति बोधो भवति । अस्यैवार्थस्य सुखपरिज्ञानाय विशेषणविशेष्यभावं व्यत्यस्याभिलपने विधिविषयीभूतभावनाशब्दाभिधेयकृतिविषयोऽग्निहोत्रहोम इत्यर्थकेन अग्निहोत्रहोमः कर्तव्य इति वाक्येन तदाभिलापस्सम्भवतीति ॥ **विधीयत इति** ॥ ज्ञाप्यत इत्यर्थः । **विहित इति** । सप्तम्युद्देश्यत्वार्थिका ॥ एवमन्योद्देशेन विहितं यत्तदेवांगपदाभिधेयमिति व्युत्पादयितुं **तदङ्गतयेति** फलितकथनम् ॥ ननु दधि द्रव्यम्, न गुणः, तदाह । **कर्माङ्गेति** । तथा च पारिभाषिकं गुणत्वमिति भावः ॥ इदञ्च गुणत्वं प्रकृतोदाहरणवाक्यमात्राभिप्रायेण ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ङ्गतया विहितत्वमेव दध्यादेर्गुणत्वम् । अत्र होमस्योद्देश्यत्वं नाम मानांतरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम् । तस्यैव मानांतरप्राप्तस्य पुनः कथ्यमानत्वरूपमनुवाद्यत्वं दध्यादिगुणान्वयितया प्राधान्यञ्च । दध्यादेस्तु मानान्तराप्राप्तत्वादत्रैव विधेयत्वं होमसाधनत्वाच्च होमापेक्षया गुणत्वं पुरुषेणानुष्ठीयमानत्वाच्चोपादेयत्वं चेति । अत्र मानान्तरप्राप्तत्वम् मानान्तरज्ञातत्वम्, अप्राप्तत्वञ्चाज्ञातत्वमिति बोध्यम् । उत्पन्नस्य कर्मणः फलाकांक्षायां फलसम्बन्धबोधको विधिः फलविधिः । यथा 'अग्निहोत्रं जुहुयात् स्वर्गकाम'

सार्वत्रिकं तु क्रियाभेदसमानाधिकरणं विधेयत्वमिति दिशा चिंतनीयं। तेन गुणकामवाक्येषु दध्यादेः कर्मांगत्वविरहेऽपि न क्षतिः ॥ उपरिष्टान्नामधेयप्रस्तावे आक्षेपमेकं परिहरिष्यन् उद्देश्यत्वानुवाद्यत्वप्राधान्यरूपमेकं, उपादेयत्वविधेयत्वगुणत्वरूपमपरमिति त्रिकद्वयमभिधास्यति । तत्र यत्र क्वचिदेतद्व्युत्पादनेऽवश्यकर्तव्ये 'दध्ना जुहोती' ति प्रकृतवाक्ये होमगतोद्देश्यत्वेन तद्घटितत्रिकस्य, दधिगतविधेयत्वेन तद्घटितत्रिकस्यचोपस्थितत्वेन 'इहवा वक्तव्यन्तत्रवेति न कश्चिद्विशेष' इति न्यायमनुसृत्यात्रैव तद्द्वयन्निरूपयत्यत्रेत्यादिना ॥ फलाकांक्षायामिति । फलस्य विशिष्य जिज्ञासायामित्यर्थः । तेन विधिसामर्थ्येन सामान्यरूपेण फलान्वयान्निराकांक्षान्वयबोधजनके 'अग्निहोत्रं जुहोती'त्यादिस्थले फलाकाङ्क्षाशान्त्यवश्यम्भावेऽपि न प्रकृतासंगतिः । अत्र स्वर्गकामपदस्य स्वर्गे लक्षणा । अध्याहारमपेक्ष्यास्या लघुत्वात् । प्रथमा द्वितीयार्थे । द्वितीया तृतीयार्थे । तथाचाग्निहोत्रहोमेन स्वर्ग

Digitization by Arya Samaj Charitable Foundation, Chennai

इति । अत्र यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेदित्यग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसम्बन्धो बोध्यत इति फलवाक्यमिदम् । प्राप्तं कर्माश्रित्य फलाय गुणविधौ फलाय गुणवाक्यं । यथा 'दध्नेन्द्रियकामस्य जुहुया' दिति । अत्राग्निहोत्रवाक्योत्पन्नं होममाश्रित्येन्द्रियफलाय दधिरूपो गुणो विधीयते होमाश्रितेन दध्ना इन्द्रियरूपं फलं भावये-

---

भावयेदित्यस्यैव बोधस्यास्मन्मते प्रामाणिकत्वेऽपि व्युत्पित्सुसौकर्याय व्यथाश्रुतार्थमेवाहात्रेत्यादिना ॥ तत्साधनत्वेनेति । यद्यपि स्वर्गसाधनतावाचिपदाश्रवणादिदमसंगतमिति भाति । तथाऽपि स्वर्गसाध्यकहोमसाधनकभावनाविषयकप्रथमबोधानन्तरं होमः स्वर्गसाधनमिति तत्साधनत्वरूपतत्सम्बन्धावगाहिनः पाश्चात्यबोधस्योदयान्नानुपपत्तिरिति ॥ कर्माश्रित्येति । आश्रयत्वेन कर्मणो गुणे सम्बन्धमंगीकृत्येत्यर्थः ॥ लक्षणं संगमय्य प्रदर्शयति अत्रेत्यादिना ॥ एतदुपपादकं साक्षाच्छाब्दबोधाकारं दर्शयति होमेति ॥ इयमत्रोपपत्तिः— एतद्वाक्यमात्रपर्यालोचने विशिष्टहोमभावनाप्रतीतावपि वाक्यान्तरविहिताग्निहोत्रहोमप्रकरणपठितैतद्वाक्यघटकधातूपस्थापितं प्रकरणपर्यालोचने बुद्धौ विपरिवर्तमानं तादृशविजातीयहोमं विषयीकर्तुमशक्नुवन्नेतद्वाक्यघटकः अज्ञातज्ञापनस्वभावो विधिर्गुणमेव पक्षप्राप्तदध्यात्मकं विषयीकरोति । दध्ना इन्द्रियं भावयेदिति विधेराकारः सम्पद्यते । एवं सति दध्नस्सिद्धद्रव्यतया शिक्यस्थेनापि तेन फलनिष्पत्तिसम्भवे पुरुषव्यापारानपेक्षणाद्विधिरफल इति तत्सामर्थ्याद्दधिसाध्यक्रियाविशेषस्य कस्यचिदवश्यापेक्षितत्वे प्रकरणेन समर्प्यते यस्सएव

Digitization by Arya Samaj Charitable Foundation, Chennai

दिति । होमाश्रितेन होमकरणीभूतेनेत्यर्थः । अयमेव गुणफल-विधिर्गुणकामविधिरपि चोच्यते । द्रव्यदेवतादिगुणविशिष्ट-कर्मविधायकं वाक्यं सगुणकर्मोत्पत्तिवाक्यम् । यथा 'सोमेन यजेते' ति । अत्र सोमलताविशिष्टो यागो विधीयते । विशिष्ट विधावपि विशेषणस्यार्थाद्विधिः । क्वचित् कर्मोत्पत्तिवाक्यमेव

गृह्यते । अयमेव चाश्रय इति व्यवह्रियते । एवञ्च प्रकरणसहकारेण होमाश्रितेन दध्ना इन्द्रियं भावयेदिति बोधो वाक्यादस्माद्भवति । धात्वर्थस्तु साधुत्वार्थमनुवाद इति ॥ **गुणफलेति** । गुणजन्यं यत्फलं तद्बोधकविधिवाक्यमित्यर्थः । गुणफलसम्बन्धबोधकविधिवाक्यमिति यावत् ॥ कामोऽपि फलमेव ॥ **देवतादीति** । 'यदाग्नेय' इति देवताविशिष्टस्य, 'यदग्नीषोमीयं पशुमालभत' इति लिंगसंख्या-दिविशिष्टस्य च कर्मणो विधायकमिति ध्येयम् ॥ ननु 'व्रीहि-भिर्यजेते' तिवद्गुणवाक्यमवेदमस्तु तत्राह **अत्रेति** ॥ तत्र याग-स्य मानान्तरप्राप्तत्वाद्युक्तं गुणविधिरिति । प्रकृतेतु न प्राप्तिरस्ति । 'ऐन्द्रवायवं गृह्णाति' 'मैत्रावरुणं गृह्णाती' त्यादिवाक्यानान्देवतावि-शिष्टग्रहणमात्रविधायकत्वस्य पशुसोमाधिकरणसिद्धत्वात् । अधिका-रवाक्येऽपि लाघवाद्वाक्यान्तरविहितकर्मान्तरानुवादस्यैवापत्त्या विजा-तीयकर्मविधायकत्वासम्भवस्योपपादितत्वादिति भावः । **विशिष्टेति** ॥ अयमर्थस्सोमपदे मत्वर्थलक्षणया लभ्यः । ननु विशेषणविशेष्यात्मक-विशिष्टविधौ विधेरुभयतात्पर्यकत्वे विधेयानेकत्वेन वाक्यभेदः । अथ विशेष्यमात्रपरत्वम्, विशेषणन्तर्हि अवैधमापद्यते इत्याशंक्य समा-धत्ते **विशिष्टेत्यादिना** ॥ **विशिष्टविधावपि** विशिष्टविधौ सत्यपि ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

फलसंबन्धबोधकमपि भवति । यथा— 'उद्भिदा यजेत पशुकाम' इति । अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयत इत्येकमेवेदं वाक्यं फलसाधनतया कर्मविधायकम् ॥

प्रधानविधिरेवांगविधिभिरेकवाक्यतया महावाक्यतापन्नः सन् सर्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् प्रयोगविधिरुच्य-

---

इदमेवोक्तशङ्कासमर्पकम् ॥ **अर्थादिति** ॥ सामर्थ्यादित्यर्थः । न हि विशेषणमननुतिष्ठता विशिष्टमनुष्ठातुं शक्यम् । अतो विशिष्टमनुष्ठापयन् श्रूयमाणो विधिर्विशेष्यमात्रे तात्पर्यवानपि स्वबोधितानुष्ठाननिर्वाहाय विध्यन्तरं विशेषणविधायकमाक्षिपति । नतु तत्रापि स्वयं व्याप्रियत इति न विशेषणस्यावैधत्वं न वा वाक्यभेद इति ॥ विधिवाक्यविभागे आदिपदार्थयोराद्यमुदाहर्तुमाह । **क्वचिदिति** ॥ **उद्भिन्नामक इति** ॥ उपरिष्टादिदं स्पष्टीकरिष्यते ॥ 'सौर्यञ्चरुन्निर्वपेद्ब्रह्मवर्चसकाम' इति तु द्वितीयस्योदाहरणम् ॥

पुनरपि विधिश्चतुर्विधः । उत्पत्तिविनियोगप्रयोगाधिकारविधिभेदात् । तत्र कर्मस्वरूपबोधकः 'अग्निहोत्रं जुहोती'त्यादिराद्यः । अङ्गताबोधकः 'व्रीहिभिर्यजेते'त्यादिर्द्वितीयः । कृतिसाध्यताबोधको नित्यानुभेयः अस्मिन्देशे काले एते कर्तार इदमित्थं कुर्युरित्येवं रूपस्तृतीयः । अधिकारबोधकः 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादिरन्त्यः । अत्र सुबोधतया इतरानुपेक्ष्यावश्यनिरूपणीयापूर्वतद्भेदनिरूपणप्रसंगसम्पादकन्नित्यानुमेयं प्रयोगविधिमेव निरूपयितुमुपक्रमते । **प्रधानेति** ॥ **एकवाक्यतयेति** ॥ वाक्यैकवाक्यतयेत्यर्थः ॥ तदर्था-

Digitization by Arya Samaj Charitable Foundation, Chennai

ते। यथा 'अग्निहोत्रं जुहुयात् स्वर्गकाम' इति। अत्राग्निहोत्रहोमेन स्वर्गं भावयेदित्यर्थः प्रतीयते। भावयेत् उत्पादयेत् कुर्यादिति यावत्। अत्र कथमनेन होमेन स्वर्गं कुर्यादिति कथम्भावाकाङ्क्षा जायते, यथा कुठारेण द्वैधीभावं कुर्यादित्युक्ते भवत्याकाङ्क्षा कथमनेन द्वैधीभावं कुर्यादिति। अत्रोद्यमननिपातनादिसहायेनेति गम्यते। तद्वदत्रापि 'अग्निं प्रणयति' 'अग्निषु समिध आदधाती' त्याद्यङ्गविधिविहितप्रणयनसमिदाधानार्यतनशोधनादिकाङ्गकलापजनितोपकारसहितेनाग्निहोत्रहोमेन स्वर्गं कुर्यादिति प्रकरणकल्पितेन महावाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयत इत्येतादृशः प्रयोगविधिः। अङ्गजातमेवेत्थम्भाव इति इतिकर्तव्यतेति चोच्यते। अत्राग्निहोत्रहोमः प्रधानं प्रण-

---

न्वितस्वार्थविषयकशाब्दबोधजनकत्वं वाक्यैकवाक्यत्वम्। तादृशस्वार्थोपस्थितिजनकत्वं पदैकवाक्यत्वम्॥ ननु कथम्भावापरपर्यायेति कर्तव्यताकाङ्क्षायां तस्या एवान्वयमभिधाय तद्विशिष्टकर्मप्रयोगो विधीयत इति वक्तव्ये तादृशाकाङ्क्षयाऽङ्गान्वये सांगकर्मप्रयोगो विधीयत इति कथमुच्यत इति शङ्कानिदानभूतं अंगेत्थम्भावेतिकर्तव्यतापदानां भिन्नार्थत्वभ्रमं वारयति। अङ्गजातमिति॥ अत्रानंगमितिकर्तव्यता नैवास्ति। अनितिकर्तव्यतात्वंगमस्ति मन्त्रादिकमिति बोध्यम्॥ इत्थम्भाव इति॥ इत्थं ईदृशप्रकारवान् तस्य भाव इत्थम्भावः। ईदृश इति प्रकारविशेषपरिचायकम्। तथा च प्रकारवत्वात्मकः प्रकारस्तदर्थः॥ इतिकर्तव्यतेति॥ इतिइत्थं ईदृशप्रकारेण कर्तव्यं साध्यं इतिकर्तव्यं तस्य भावः इतिकर्तव्यता। ईदृशप्रकारविशिष्ट-

Digitization by Arya Samaj Charitable Foundation, Chennai

यनादिकं सर्वमङ्गम् ॥

साध्यत्वञ्च साध्यनिष्ठेदृशप्रकारकत्वात्मक ईदृशप्रकारे पर्यवस्यति । तथाचात्रापि प्रकारार्थकत्वं पूर्ववत् ॥ प्रकारोनाम विशेषः । तत्राख्यातेन भावनाशब्दाभिधेयव्यापारसामान्याभिधाने कथम्भावयेदिति तद्विशेषजिज्ञासायां प्रयाजादिकं क्रियात्मकमंगजातमन्वीयमानं तां शमयति । तदेवं सामान्यरूपभावनायाः प्रयाजादिकं विशेष इति तदेवेतिकर्तव्यताशब्देनाभिधीयते । अत एव विशेषाकाङ्क्षारूपकथम्भावाकाङ्क्षापूरकत्वमेव इतिकर्तव्यतात्वमिति मिश्रो मेने । करणगत शक्त्याधायकसामग्रीत्वन्तदिति तु देवः ॥ अंगत्वस्यांगिसापेक्षत्वात् तत्कीर्तनपुरस्सरं प्रकृते इतिकर्तव्यतापदाभिधेयमङ्गजातमुदाहरति । **अत्रेत्यादिना** ॥ यद्वा ननु समानप्रकरणोत्पन्नानां सर्वेषामेव कर्मणां साक्षात्फलकरणत्वोपपत्तौ एकस्यैव तदङ्गीकृत्य 'फलाय साङ्गाग्निहोत्रप्रयोग' इति न युज्यत इत्याशङ्कापरिजिहीर्षया 'फलवत्सन्निधावफलं तदङ्ग'मिति न्यायसिद्धं प्रकृतकर्मणामङ्गाङ्गिभावं प्रतिपादयति । **अत्रेत्यादिना** ॥ प्रकरणपठितानामेकयागार्थानां बहूनामङ्गानान्नवैकल्पिकत्वम् । यागस्योपकारकाकाङ्क्षायां खले कपोतन्यायेन सर्वाङ्गान्वयेन तेषामेकयागोपकारार्थत्वावगमेऽपि व्रीहियववद्दीधपयोवद्वा प्रधानस्वरूपनिष्पत्तिरूपदृष्टद्वारकत्वविरहेणादृष्टद्वारकत्वावश्यम्भावे एकजन्यादृष्टस्यापरेण जनने मानाभावेन तत्समुच्चयस्यावश्यापेक्षितत्वादिति सूचयति । **सर्वमिति** ॥ इदन्त्विह वक्तव्यं—उक्तं प्रागधिकारबोधको विधिरधिकारविधिरिति । अधिकारश्च प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणं कर्तृत्वम् । सोऽयमधिकारः

Digitization by Arya Samaj Charitable Foundation, Chennai

नन्विदमनुपपन्नम्- आशुतरविनाशिनां कर्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेरितिचेत् । मैवम् । विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्त्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते । ततश्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वं । न साक्षात् । तदेव फलापूर्वम् । तत्करणत्वञ्च प्राच्योदीच्याङ्गविशिष्टस्य प्रधानस्य भवति, न प्रधानमात्रस्य । प्रधानमात्रादेव फलापूर्वजनने फलस्यापि तत एव सिद्धेरङ्गानामानर्थक्यापत्तेः । ननु सर्वाङ्गविशिष्टस्य प्रधानस्यापूर्वजनकत्व-

---

फलवाक्येन बोध्यत इति 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्ययमधिकारविधिरेव विनियोगविधिर्वा न तु प्रयोगविधिः । तत्र तु प्रयोगो विधीयेत यत्र प्रयोगान्वयी गुणो देशः कालः कर्ता वा श्रूयेत । यथा 'समे दर्शपूर्णमासाभ्यां यजेत' 'सायं जुहोती' त्यादौ । तथाच प्रधानविधिरेवेत्यादिनाऽभिहितं 'अग्निहोत्रं जुहूयात्स्वर्गकाम' इत्यस्य प्रयोगविधित्वन्न घटत इति । वाक्यैकवाक्यतैकप्राणः प्रयोगविधिरितीदं शिष्यान् सुखं ग्राहयितुं अधिकारवाक्यमपीदं प्राचीनमतच्छायया प्रयोगविधिं कृत्वोदाजहारेति तु मन्तव्यम् ॥

परमापूर्वसाधनानुकूलं प्रयोगविध्याक्षेपमुपक्षिपति। नन्विति॥ इदं अग्निहोत्रादिप्रयोगस्य स्वर्गादिफलाय विधानम् ॥ कालान्तरेति ॥ 'यन्नदुःखेने' त्यादिना लक्षितस्य दुःखासंमिश्रस्य सुखस्य लोकेऽस्मिन्कचिदप्यननुभवादिति भावः ॥ अवगत इति ॥ तथाच श्रुतार्थापत्तिप्रमाणकमपूर्वमिति भावः ॥ इतरनिरपेक्षं प्रधान-

Digitization by Arya Samaj Charitable Foundation, Chennai

मयुक्तम्, आशुतरविनाशिनः प्रधानस्याङ्गसाहित्याभावादिति चेन्न । प्रधानकर्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसम्भवात् । प्रधानस्य सर्वाङ्गसाहित्यसिद्ध्यर्थं प्रधानकर्मपरमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किंचिदपूर्वमस्तीत्यङ्गीकारात् । एवमङ्गानामपि परस्परसहितानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात् तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यम् । अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव ॥

दर्शपूर्णमासयोस्तु विशेषः । 'यदाग्नेयोऽष्टाकपालोऽमा-

मात्रेण तदनुष्ठानोत्तरक्षणे जायमानमुत्पत्तिसंज्ञमपूर्वान्तरं साधयितुम्भूमिकामारचयति । तदिति ॥ तत्करणत्वं परमापूर्वकरणत्वम् ॥ प्राच्यं प्रधानप्राक्कालिकम् ॥ उदीच्यं तदनन्तरकालिकम् ॥ 'उत्पत्त्यपूर्वद्वारा साहित्यसम्भवा' दित्येतदेव विवृणोति । प्रधानस्येति ॥ अथांगजन्यापूर्वसाधनायाह । एवमिति । सहितानामेवेति ॥ एकस्यैव तथात्वे इतरवैयर्थ्यात् विकल्पासम्भवस्यचोक्तत्वादिति भावः ॥ देवतोद्देशेन द्रव्यत्यागरूपो यागः न स्वात्मलाभे प्रयाजादिकमपेक्षत इति प्रधानोपकारकत्वमन्यादृशमाह । अङ्गानामिति ॥ आरादुपकारकाणामिति शेषः ॥ प्रधानस्येति तद्वृत्तित्वार्थकं सामर्थ्यान्वयि ॥ उन्मुखीकरणं सम्पादनम् ॥

यागस्वर्गयोर्मध्ये उत्पत्त्यपूर्वफलापूर्वभेदभिन्नमपूर्वद्वयमेतावता साधितम् । अनयोरपि मध्ये क्वचिदपूर्वान्तरमावश्यकमिति प्रतिपादयितुमुपक्रमते । दर्शेति ॥ ननु को दर्शः कः पूर्णमासः तन्निरूपयन्

Digitization by Arya Samaj Charitable Foundation, Chennai

वास्यायाश्च पौर्णमास्याश्चाच्युतो भवती'त्याग्नेययागो विहितः । 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छ'दित्यग्नीषोमीययागो विहितः । 'उपांशुयाजमन्तरा यजती' त्युपांशुयाजः 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशुपौर्णमास्यां यज' न्निति वाक्यात् पौर्णमास्यां विहितः । एतानि पौर्णमास्यां प्रधानानि । एषामाग्नेयाग्नीषोमीयोपांशुयाजानां तत्तद्वाक्यावगतपौर्णमासीकालसम्बन्धं निमित्तीकृत्य 'य एवं विद्वान् पौर्णमासीं यजत' इति विद्वद्वाक्ये पौर्णमासीपदेनैकवचनान्तेन समुदायरू-

---

पूर्णमासोपक्रमत्वाद्दर्शपूर्णमासप्रयोगस्य तमेवादौ प्रतिपादयितुमाह । यदाग्नेय इति ॥ कूर्मीभूयप्रसर्पन् पुरोडाशः देवैः 'इन्द्रायाध्रियस्व अवतिष्ठस्व, बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्व' इत्युच्यमानोऽपि नावतस्थे । अथ तै 'रग्नये ध्रियस्वे'त्युक्तस्तस्थौ । कुतः । तत्र हेतुरुच्यते । यस्मादग्निदेवत्यः पुराडाशोऽयं पर्वद्वयेप्यच्युतो भवति तस्मात्, अग्निदेवतासंबन्धेनैव स्वस्य पर्वद्वयेऽच्यवनं यस्मात्तस्मादिति विषयवाक्यार्थः । अत्र आग्नेय इति न नामधेयम् कर्मणः । अपि तु विधेयाग्निसमर्पकमिति प्रथमचतुर्थे 'तद्गुणास्तु विधीयेर' न्नित्यत्र स्थितम् ॥ विहित इति ॥ अत्र यद्वृत्तस्य प्राप्तिद्योतकत्वेऽपि वस्तुतोऽप्राप्तार्थविधौ न प्रतिबंधकत्वमिति ज्ञेयम् ॥ ताभ्यामिति ॥ ताभ्यां अग्नीषोमाभ्यां । चतुर्थीयम् । प्रायच्छत् दत्तवानिन्द्र इत्यर्थः ॥ अत्र परकृत्यर्थवादे अप्राप्तिबलकल्प्यविध्यर्थत्वं बोध्यम् ॥ तावब्रूतामिति ॥ कालविधिः पुराकल्पार्थवादोऽयं ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

पेणानुवादः । तेन वेदे यत्र यत्र पौर्णमासीशब्दः, तत्र तत्राग्नेय्यादिसमुदायोपस्थितिः। ननु 'यदाग्नेय' इति वाक्ये यागवाचकपदस्याश्रवणात् कथं यागविधायकत्वमितिचेत् । मैवम्। अग्निर्देवता अस्य पुरोडाशस्येत्यर्थे विहितदेवतातद्धितान्त आग्नेयशब्दः । तस्य पुरोडाशपदसामानाधिकरण्याद्द्रव्यदेवतासम्बन्धोऽवगतः । स च यागमन्तरेण न सम्भवति । द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवात् यागक्रियायामेव सम्भवो वाच्यः । देवतोद्देशेन द्रव्यत्यागस्य यागरूपत्वाङ्गीकारात् । अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो यजेतेति कल्पितपदेन

अनुवाद इति ॥ अस्य वाक्यस्य यच्छब्दघटितत्वात् रूपाभावादन्यपरत्वाच्च न कर्मविशेषविधायकत्वम् । अपितु फलवाक्यघटकेन दर्शपूर्णमासाभ्यामिति पदेनोपस्थापितस्य द्वित्वदर्शपूर्णमासकालिकत्वोभयावच्छिन्नकर्मरूपार्थस्य प्रसिद्धिसम्पादकत्वमिति स्थितं द्वितीये ॥ ननु कथमयमनुवादस्त्रयाणामेव । अविशिष्टं हि प्रकरणं तत्कालिकानुष्ठानकत्वं वा प्रयाजादीनामपि सत्यम्। येषान्तूत्पत्तिवाक्ये कालसम्बन्धः श्रुतः तेषामुपस्थितिः पौर्णमास्यादिपदाज्झटिति भवति। न च प्रयाजादिविधिषु कालः श्रूयते । तदेतदभिसन्धायोक्तं तत्तद्वाक्यावगतकालसम्बन्धं निमित्तीकृत्येति ॥ देवतोद्देशेनेति ॥ यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वादित्यर्थः ॥ यजेतेति कल्पितेनेति ॥ भवतिस्थाने यजेतेत्यस्य विपरिणाममङ्गीकृत्येदम् ॥ 'मतो विपरिणामोऽसौ प्रकृतिप्रत्ययान्यते' ति प्रकृत्यन्यत्वं प्रत्ययान्यत्वमुभयान्यत्वं वा विपरिणामो भवति ॥ तत्र प्रकृते उभयान्यत्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

विधीयते– अग्निदैवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेनेष्टं भावयेदिति । एवं यत्र द्रव्यदेवतासम्बन्धमात्रं श्रूयते 'सौर्यं चरुं निर्वपे' दित्यादौ, तत्र द्रव्यदेवतासम्बन्धानुमितो यागो विधीयत इति न कश्चिद्दोषः । ननूपांशुयाजवाक्ये यजिश्रवणेऽपि विधिप्रत्ययस्य लिङादेरभावात् कथं विधायकत्वमिति चेत् । मैवम् । यजतीत्यस्य यजेतेति विपरिणामेन विधायकत्वसम्भवात् । एवं यत्र लिङादिर्न श्रूयते 'व्रीहीन् प्रोक्षति' 'समिधो यजती'त्यादौ, तत्र विपरिणामो बोध्यः । केचित्तु यजतीत्यस्य पञ्चमलकारत्वाङ्गीकारात् विधायकत्वसम्भव इत्याहुः ॥

रूपः । उपांशुयाजवाक्ये वक्ष्यमाणस्तु प्रत्ययान्यत्वरूप इति ॥ ननु श्रूयमाणस्य शब्दस्य विवक्षितार्थे लाक्षणिकत्वे सम्भवति किमिति शब्दान्तरं कल्प्यते । न च लक्षणावा कल्प्यतां शब्दान्तरंवेति न किंचिद्विनिगमकमिति वाच्यम् । अन्यथात्वे श्रूयमाणानुपूर्व्यवच्छिन्नस्य नैष्फल्यप्रसंगस्यैव लक्षणायां विनिगमकत्वादितिचेन्न । सर्वत्र उपपत्तिमतश्शक्यसम्बन्धस्य दुर्वचत्वात् । अन्यथा अध्याहारस्थलेषु सर्वत्र श्रुतपदस्यैव लक्षणया अध्याहरणीयार्थप्रतिपादकत्वसम्भवेनाध्याहारोच्छेदापत्तेः । यथाकथंचिदन्यत्र तथा सम्भवेऽपि प्रवर्तनात्मकविधेः प्रतिपादनाय विपरिणामस्यावश्यकत्वाच्च। न हि लिङ्लोट्तव्यादिरूपविधिप्रत्ययव्यतिरिक्तेन पदेन लक्षणया शक्त्यावा प्रतिपादितां प्रवर्तनामवगम्य कश्चित्प्रवर्तमानो दृश्यत इति॥ पञ्चमलकारत्वेति ॥ लेट्त्वेत्यर्थः ॥ लडादिचतुष्टयापेक्षं पञ्चमत्वम् ॥ अङ्गीकारादिति ॥ उक्तञ्चेदं 'अप्राप्तार्थकत्वेन लेट्त्वनिश्चयात्

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा 'ऐन्द्रं दध्यमावास्यायां' 'ऐन्द्रं पयोऽमावास्याया' मिति वाक्यविहितौ साम्नाय्ययागौ 'यदाग्नेय' इति वाक्यविहिताग्नेयश्चामावास्यायां प्रधानानि । एषां त्रयाणां 'य एवं विद्वानमावास्यां यजते' इति वाक्ये अमावास्यामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र दर्शशब्दोऽमावास्याशब्दो वा श्रुतस्तत्र यागसमुदायोपस्थितिः । त्रिकस्य त्रिकस्यामावास्यापौर्णमासीशब्दाभ्यां समुदायरूपेण विद्वद्वाक्येऽनुवादस्य प्रयोजनन्तु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते' त्यादौ द्विवचनोपपत्तिः । अन्यथा षण्णामाग्नेयादियागानां बहुत्वाद्दर्शपूर्णमासैरिति बहुवचनं स्यात् । मानान्तरेण प्राप्तार्थस्य पुनःश्रवणमनुवादः । तथा फलवदाग्नेयादिसन्निधा-

---

लट्लेटा रूपसाम्येन कस्याप्यकल्पनीयत्वा'दिति ॥

निरूपितं कः पूर्णमास इति । अथ को दर्श इति । तथेति पूर्णमासापेक्षम् ॥ यदाग्नेय इति ॥ अत्र वाक्ये कालद्वयश्रवणादेकस्य च कर्मणोऽनावृत्तस्य तादृशकालद्वयेऽनुष्ठातुमशक्यत्वात् पौर्णमास्यामनुष्ठितस्याग्नेययागस्यैवावृत्त्या पुनरमावास्याकालेऽनुष्ठानमिति बोध्यम् । वस्तुतस्तु 'एकादशप्रयाजान् यजती' त्यादाविव उत्पन्नशिष्टस्य गुणस्यावृत्तिबोधकत्वेऽपि उत्पत्तिशिष्टोऽयमेकस्मिन्कर्मणि निवेष्टुमशक्नुवन् कालद्वयरूपो गुणः स्ववाक्यविधेयकर्मणी परस्परं भिनत्तीति 'यदाग्नेय' इति विधिना कालद्वयाधिकरणकाग्नेयद्वयं विधीयत इति द्वितीयकौस्तुभे स्थितम् ॥ उत्पत्त्यपूर्वाङ्गापूर्वसाधनोपयोगिनं प्रयाजादीनां दर्शपूर्णमासांगभावमाह । तथेति ॥ फलवत्सन्निधावफलन्तदंगमिति

Digitization by Arya Samaj Charitable Foundation, Chennai

वाम्नातानि प्रयाजाज्यभागानूयाजादीनि षण्णां यागानामङ्गभूतानि ॥

एवं स्थिते 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यस्यायमर्थः- दर्शपूर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्वर्गापूर्वं कुर्यादिति । तत्र कथं कालद्वयवर्त्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां स्वरूपेण साहित्याभावेऽपि त्रिकात्रिकादेकैकमपूर्वं जायते, तद्द्वारा द्वयोः समुदाययोः साहि-

---

न्यायं सूचयति । फलवदिति ॥ एतन्न्यायानादरे प्रकृतहानाप्रकृतकल्पने स्यातामिति हृदयम् ॥

एवं दर्शपूर्णमासपदार्थौ व्युत्पाद्य तद्गतं विशेषं प्रतिपादयितुमाह । एवं स्थित इति ॥ फलानि सन्तीत्यादौ फलादीनामेककालिकत्वमुत्सर्गतः प्रतीयत इति सर्वानुभाविकमिदम् । एवं प्रकृतेऽपि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते' त्यत्रैकपदोपात्ततयोक्तसमुदायद्वयस्य समानकालिकत्वं प्रतीयते । तच्च परस्परसाहित्यमित्युच्यत इत्यभिसन्धायाह । परस्परसहिताभ्यामिति ॥ परमापूर्वं प्राग्वत्सिद्धमिति मत्वाऽऽह । स्वर्गापूर्वमिति ॥ नचात्र समुदायापूर्वद्वयस्यैव व्यापारत्वसम्भवात् न प्रमाणं परमापूर्व इति मन्तव्यम् । येन रूपेण दर्शपूर्णमासाभ्यां स्वर्गो जन्यत इति बोध्यते तेनैव रूपेण ताभ्यां तद्व्यापारोऽपि जनयितव्यः । परस्परसाहित्यावच्छिन्नाभ्याञ्च ताभ्यां स्वर्गो जन्यत इति बोध्यते । तत्र यदि समुदायापूर्वं व्यापारः, व्याहन्यते तर्हि तत्र साहित्यावच्छिन्नसमुदायद्वयजन्यत्वम् । प्रत्येकं हि तत्ततो जायत इति ॥ एकैकमिति ॥ अथास्मिन्समुदायापूर्वे प्रमाणा-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्यमित्युच्यते । एकैकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकाङ्क्षायां प्रयाजानूयाजादिपूर्वोत्तराङ्गकलापविशिष्टस्यैकैकस्य त्रिकस्य समुदायापूर्वजनकत्वमुच्यते । एकैकस्य त्रिकस्य

भावः । पौर्णमासीकालिककर्मत्रयात्रीणि दार्शिकत्रयात्रीणीत्यमीभिरेव षड्भिरपूर्वैः समुच्चित्य साक्षात्परमापूर्वजननोपपत्तेः । नन्वेवं साक्षादाग्नेयादिष्वेव प्रत्येकं स्वर्गकरणत्वस्य विश्रान्तेः फलवाक्ये श्रुतं समुदायगतं तत्करणत्वं भज्येत । नैष दोषः । समुदायस्यानतिरिक्तत्वात् तत्रापि प्रत्येकं फलकरणत्वपर्याप्त्यधिकरणयागषट्कस्यैव दर्शपूर्णमासपदेनोपात्तत्वादिति । अत्राहुः । अस्ति वाक्यद्वयं 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायां अमावास्यया यजेते'ति प्रत्येकमाग्नेयादिसमुदायद्वये कालद्वयविधायकम् । नचोत्पत्तिवाक्यादेव कालप्राप्तिः । षण्णां षट्सु पर्वस्वनुष्ठानप्रसक्तौ त्रयाणान्त्रयाणामेकस्मिन्पर्वण्यनुष्ठानस्यैतद्वाक्यफलत्वात् । तत्र प्रतिवाक्यं मिथस्साहित्यावच्छिन्नं कारणतात्रयमवगम्यते । किन्निरूपितन्तत्साहित्यमिति तावद्विवेक्तव्यम् । न फलन्तन्निरूपकम् । तत्कारणतानां षट्त्वावच्छिन्नत्वात् । अत एव न परमापूर्वम् । नाप्युत्पत्त्यपूर्वम् । तत्कारणतायास्त्रित्वानवच्छिन्नत्वात् । अतोऽत्र यत् कल्पनीयम्भवति तदेव समुदायापूर्वमिति ॥ समुदायापूर्वानुकूलप्रधानोत्पत्त्यपूर्वकल्पनमुपपादयिष्यन् तदुपयोगितयाऽङ्गकलापवैशिष्ट्यं प्रतिपादयति । **एकैकस्येति** । **विशिष्टस्येति** ॥ प्रत्येकमुत्पन्नानामाग्नेयादिप्रधानभावनानाम्प्रत्येकमेवेतिकर्तव्यताकाङ्क्षितया तदन्वितानां प्रयाजादीनां प्रत्येकांगत्वेन यद्यपि पूर्वोत्तरांगवैशिष्ट्यरूपविशेषणस्य प्रत्येकं प्रधाने विवक्षणमु-

Digitization by Arya Samaj Charitable Foundation, Chennai

सर्वाङ्गसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्त्यपूर्वाणि जन्यन्ते, तद्द्वारा सर्वाङ्गसाहित्यम्। अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात्तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं वाच्यम्। तथा च प्रधानजन्योत्पत्त्यपूर्वाणां प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति, तदेव प्रधानानामङ्गविशिष्टत्वरूपं साङ्गत्वम्। एवञ्च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते। तथा दर्शेऽपि आग्नेयैन्द्रद्वयजन्यैस्त्रिभिरपूर्वैरङ्गोत्पत्त्यपूर्वसचिवैरेकं त्रिकापूर्वं जन्यते। ताभ्यां त्रिकापूर्वाभ्यामाग्नेयाद्युत्पत्त्यपूर्वत्रितयजन्याभ्यां फलजनकीभूतमहापूर्वं फलापूर्वनामकं जन्यते। ततश्च फलमिति॥

चितम्, न तु समुदाये, तथाऽपि प्रकृते त्रयाणामेकदेशकालकर्तृकतया तदंगानां सकृदनुष्ठानेनैव सर्वोपकारकत्वोपपत्तेः तन्त्रेणैवानुष्ठानमित्येतत्सूचयितुं **अङ्गकलापविशिष्टस्यैकैकस्य त्रिकस्येति**॥ अंगोत्पत्त्यपूर्वं प्रतिपादयति। **अङ्गानामिति**॥ ननु प्रधानांगापूर्वयोरुपपादितरीत्या साहित्यसम्भवेऽपि प्रयोगविधिबोधितस्य साक्षात्प्रधानांगसाहित्यस्य भंगो दुष्परिहर एवेत्यत्र तादृशापूर्वद्वारकमेव तत्तत्र विधित्सितमित्याशयान इष्टापत्तिमाह। **तथाचेति**॥ एतावतः प्रबन्धस्य मुख्यविषयीभूतं दार्शपूर्णमासिकापूर्वकल्पनविशेषं सङ्कीर्तयन् तादृशापूर्वस्य स्वर्गपर्यन्तमुपयोगमभिधायापूर्वप्रकरणमवसाययति। **एवञ्चेति**॥ **सचिवैरिति**॥ प्रयाजादिजन्योत्पत्त्यपूर्वाणि सचिवाः सहकारीणि उपकारकाणि येषान्तैः। उक्तापूर्वजन्योपकारसहितैरित्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा च सर्वाङ्गोपकृताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्यादिति फलापूर्वनिष्पत्तये साङ्गप्रधानकर्तव्यताबोधको विधिः प्रयोगविधिरिति सिद्धम् ॥

पुनरपि विधिस्त्रिविधः । अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति । तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः । यथा दर्शपूर्णमासप्रकरणे 'व्रीहीन् प्रोक्षती'ति । एतद्विध्यभावे दर्शपूर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः । यो विधिः पक्षे प्राप्तमर्थं नियमयति स नियमविधिः । यथा तत्रैव 'व्रीहीनवहन्ती'

प्रकृतदर्शपूर्णमासयोस्समन्वयपूर्वकं प्रयोगविधिमुपसंहरति । तथाचेति ॥

द्वेधा विभज्य दर्शितो विधिः । क्वचित् क्रिया क्वचिद्गुणः क्वचिदुभयं क्वचित्फलसम्बन्ध इत्यादिविधेयभेदेन, क्वचित्स्वरूपं क्वचिदिष्टसाधनत्वं क्वचित्कृतिसाध्यत्वं क्वचिदधिकार इति विधेयप्रकारभेदेनच । अथायं विधिप्रवृत्तिफलभेदानुरोधेन विभज्य प्रदर्श्यते । पुनरपीत्यादिना ॥ 'विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयत' इति वार्तिकानुसारेण क्रमादिमान्विधिभेदान् लक्षयन्नुदाहरति । तत्रेति ॥ अप्राप्तमिति ॥ परिसंख्याव्यावृत्तय इदम् ॥ नियमव्यावृत्तयेऽप्राप्तावात्यन्तिकत्वमपाक्षिकत्वार्थकम् ॥ नियमविधिरिति ॥ नियमनाद्विधिरपि नियमः ॥ नावमिकन्यायेन 'व्रीहीनवहन्ती' त्यत्रापूर्वसाधनत्वस्योद्देश्यतावच्छे-

Digitization by Arya Samaj Charitable Foundation, Chennai

ति। एतद्विध्यभावे दार्शपूर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतः पुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्याय अवहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षेऽवहननस्य प्राप्त्यभावात् कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् । सत्यस्मिन् विधौ अवहननेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तत इति नियमविधिरयम् । न च वैतुष्यस्य नखविदलनेनापि सम्भवादवहननियमो व्यर्थः, प्रयोजनाभावादिति वाच्यम् । अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जायत इति नियमादृष्टाङ्गीकारात् । नियमेन दृष्टकार्यालाभेऽप्यदृष्टस्योत्पत्तेः । तच्चापूर्वं यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते । तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम् । एवं व्रीहिसोमादिद्रव्यनियमविधिषु बोध्यम् । द्वयोः समुच्चित्य प्रा-

---

दकत्वे स्थिते तदवच्छिन्ने आज्यादावप्यवहननप्रसङ्गवारणाय उत्पत्त्यपूर्वस्य व्रीहीणाञ्च मध्ये यावन्तः पदार्थाः सन्ति तावदर्थघटितं द्वारं विवक्षणीयमिति तृतीये तेषामर्थाधिकरणे निरूपितं। तदेतत् प्रसङ्गादाह । **कार्यायेत्यन्तेन** ॥ यद्वा विधित्सितस्यावघातस्य एतद्विध्यभावे पक्षेऽभावप्रसङ्गकस्य नखविदलनस्य आक्षेपकम्प्रतिपादयति । **कार्यायेत्यन्तेन** ॥ ' सर्वे द्रव्यविधयो नियमविधय ' इति प्रवादं स्मारयन्नाह । **एवमिति** ॥ **द्वयोरिति** ॥ शेषिणोरित्यर्थः । सप्तम्येषा ॥ **प्राप्ताविति** ॥ विधित्सितस्येति शेषः ॥ **इतरेति** ॥ इत-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राप्तावितरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः। यथा चयनप्रकरणे 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः। एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रो रशनाऽऽदानप्रकाशनसामर्थ्यरूपाल्लिंगादश्वरशनाऽऽदानइव गर्दभरशनाऽऽदानेऽपि नियमेन प्राप्नुयात् । सत्यस्मिन् विधौ अनेन मन्त्रेणाश्वरशनामेवाददीत न तु गर्दभरशनां सा तु तूष्णीमेव ग्राह्येति गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलकत्वादयं परिसङ्ख्याविधिः ।

रस्मान्निवृत्तिर्विधित्सितस्य ॥ परीति ॥ वर्जनबुद्धिः परिसंङ्ख्या । तत्करणाद्विधिरपि तथा ॥ सामर्थ्यापरपर्यायलिङ्गप्रमाणादुभयस्मिन्प्राप्तिमुपपादयति । एतदिति ॥ सतीति ॥ यद्यप्येवकारो नञ्वा वाक्येऽस्मिन्न श्रूयते । तथाऽपि साक्षात्प्रतीयमानस्यार्थस्य लिङ्गादेव प्राप्तः स्ववैयर्थ्यपरिजिहीर्षया तावत्पर्यन्तं वाक्यमेतद्व्याप्रियत इति ज्ञेयम् ॥ अत्र वक्तव्यमन्यत् मन्त्रप्रस्तावे वक्ष्यते ॥ अयं परिसङ्ख्याविधिरिति ॥ शेषिपरिसङ्ख्येयं 'तत्रान्यत्र' पदयोः 'प्राप्ते' इत्यनेन वैयधिकरण्येन प्रकृतविधेयप्रतिसम्बन्धितदन्यपरतामङ्गीकृत्य ॥ सामानाधिकरण्येन तयोः प्रकृतविधेयतदन्यपरत्वाङ्गीकारे तु शेषपरिसङ्ख्या । यथा गृहमेधीयाधिकरणपञ्चमपक्षे गृहमेधीयप्रकरणपठितः 'आज्यभागौ यजती'ति विधिः आज्यभागयोरङ्गान्तरेषुच चोदकतः प्राप्नुवत्सु आज्यभागौ विषयीकुर्वन्नङ्गान्तराणि परिसञ्चष्ट इति । शेषिणामनेकत्वे शेषिपरिसङ्ख्या शेषाणामनेकत्वे शेषपरि-

Digitization by Arya Samaj Charitable Foundation, Chennai

पूर्वं दर्शपूर्णमासाङ्गत्वं प्रयाजादीनामुक्तम् । तत्राङ्गत्वबोधकप्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभेदेन षट् । तत्र 'दध्ना जुहोती' त्यत्राग्निहोत्रवाक्यप्राप्तं होमं 'जुहोती' त्यनेनोद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दधि विधीयत इति श्रुत्या दध्नोऽङ्गत्वम् । लिङ्गं नाम सामर्थ्यम् । तच्च द्विविधम्–अर्थगतं शब्दगतञ्चेति । आद्यं यथा । 'स्रुवेणाव-

---

सङ्ख्येति विवेकः । केचिदत्र नियमपरिसङ्ख्यान्यप्रापको विधिराद्यः दृष्टार्थो द्वितीयः वर्जनबुद्धिजनकश्चरमइति, अन्येच नियमपरिसङ्ख्याफलव्यतिरिक्तफलतात्पर्यकः प्रथमः, तदभावाभावतात्पर्यकः तन्नियमविधिरिति द्वितीयः, तदभावतात्पर्यकः तत्परिसङ्ख्याविधिरित्यन्तिम इति निष्कर्षयन्ति ॥

प्रत्यक्षादिषु षट्सु प्रमाणेषु वैदिकशब्दात्मकमुपदेशातिदेशभेदेन द्विधा । तत्राद्यो बहुधा विभज्य दर्शितः पूर्वषट्के– विधिनिषेधात्मना प्रथमे । शब्दान्तराभ्याससङ्ख्यासंज्ञागुणप्रकरणान्तरात्मना द्वितीये । श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यात्मना तृतीये । श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्यात्मना पञ्चम इति । तत्रावश्यककतिपयपदार्थव्युत्पादनप्रवृत्तो ग्रन्थकृत् प्रथमगोचरान् कांश्चिद्विधिभेदान्निरूप्य धर्मप्रमापकयावत्प्रमाणनिरूपणानन्तरं द्वैतीयीकानि प्रमाणानि निरूपयिष्यन् विधिनिरूपणप्रसंगोपस्थितस्यांगत्वस्य प्रमापकाणि तार्तीयीकानि निरूपयितुमाह । पूर्वमिति ॥ श्रुत्येति ॥ येन शब्देन श्रुतमात्रेणैवांगांगिभावसम्बन्धो बुध्यते सा श्रुतिः । अत एव निरपेक्षो रवः श्रुतिरिति प्राचां लक्षणमिति ध्येयम् ॥ अर्थगतमिति । इमे

Digitization by Arya Samaj Charitable Foundation, Chennai

द्यती ' त्यवदानसामान्यशेषत्वावगमेऽपि स्रुवस्य सामर्थ्यरूपाल्लिङ्गादाज्यसान्नाय्यादिद्रवद्रव्यावदानविशेषाङ्गत्वं। स्रुवेण पुरोडाशाद्यवदानस्य कर्तुमशक्यत्वात्। शब्दगतं तु लिङ्गमर्थप्रकाशनसामर्थ्यम्। यथा 'अग्नये जुष्टं निर्वपामी' ति मन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपाल्लिङ्गान्निर्वापाङ्गत्वम्। यस्य मन्त्रस्य यत्प्रकाशनसामर्थ्यं तस्य तदङ्गत्वम्। पदान्तरसमभिव्याहारो वाक्यम्। यथा 'इषेत्वेति छिनत्ती'ति। अत्र छेदनाङ्गत्वेन 'इषेत्वे'तिमन्त्रो वाक्येन विधीयते। यद्वा 'अग्नये जुष्ट'मित्यत्रैव 'अग्नये' 'जुष्ट' मित्यादिपदानां 'निर्वपामी' त्यनेनैकवाक्यतापन्नत्वान्निर्वापाङ्गत्वम्। प्रकरणं नाम परस्पराकाङ्क्षा। यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यत्र दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कुर्यादित्युक्ते भवत्याकाङ्क्षा कथमा-

---

एव उभे सामर्थ्ये सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षतदपेक्षे इति व्यवह्रियेते। इष इति। न चात्र श्रुतिः। विभक्तेरश्रवणात्। न च तदर्थे लक्षणा। पर्णमयीत्यत्रापि श्रुतिविनियोगापत्तेः॥ इतिरहितं वाक्यप्रमाणमुदाहरति। यद्वेति॥ अथवा इतिरपि यदि श्रुतिस्तदाऽऽह। यद्वेति॥ अत्र निर्वपामीति पदस्य निर्वापाङ्गत्वे लिङ्गं प्रमाणम्। तद्भिन्नानां अग्नय इत्यादिपदानान्तु तदङ्गत्वे वाक्यं प्रमाणमिति विवेक्तव्यम्॥ परस्पराकाङ्क्षेति॥ अङ्गाङ्गिनोः परस्परेण परस्परस्याकाङ्क्षेत्यर्थः॥ इयमेवोभयाकाङ्क्षेत्यप्युच्यते॥ इदं द्वेधा महाप्रकरणावान्तरप्रकरणभेदात्। तत्राद्यं प्रयाजादीनामङ्गत्वग्राहकम्। द्वितीयन्तु प्रयाजादिप्रकरणपठिततदङ्गविधायकवाक्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

भ्यां स्वर्गापूर्वं कर्त्तव्यमिति । तथा फलवदाग्नेयादिसान्निध-
'समिधो यजति' 'तनूनपातं यजति' 'आज्यभागौ यजती'
त्यादिभिः प्रयाजादयः फलरहिताः श्रुताः । तेषां स्ववाक्येषु
फलाश्रवणात् भवति प्रयोजनाकाङ्क्षा किमेतेषां प्रयोजनमिति ।
ततश्च प्रयाजादीनां प्रयोजनाकाङ्क्षायां दर्शपूर्णमासयोश्च कथ-
म्भावाकाङ्क्षायां परस्पराकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां
सर्वेषां दर्शपूर्णमासाङ्गत्वं निश्चीयते ॥ स्थानं नाम सन्निधिः । यथा
सान्नाय्यपात्रसन्निधौ 'शुन्धध्व'मितिमन्त्रस्य पाठात् सन्निधा-

---

द्वयमध्यपठितवाक्यविधेयस्याभिक्रमणादेरित्यन्यत्र विस्तरः ॥ स्थान-
मिति ॥ क्रम इत्यपि सादेश्यमित्यपीदमुच्यते ॥ तदेतदपि द्वि-
विधम् । पाठसादेश्यमनुष्ठानसादेश्यमिति । आद्यमपि द्विविधं ।
यथासङ्ख्यपाठः सन्निधिपाठ इति । तत्र काम्येष्टिकाण्डसमाख्याते
वेदभागे क्रमश इष्टयो विहिताः । काम्येष्टियाज्यानुवाक्याकाण्डे या-
ज्यानुवाक्याशब्दशब्दितमन्त्रयुगळान्यपि क्रमेण पठितानि । तत्र
प्रथमेष्टेः प्रथमयुगळमङ्गं द्वितीयस्या द्वितीयमिति यथाक्रममङ्गताग्रा-
हकोऽयं यथासङ्ख्यपाठः । ग्रन्थकृदुक्तः सन्निधिपाठः । अनेकदिन-
साध्ये ज्योतिष्टोमयागे प्रधानदिनात्प्राक्तने औपवसथ्यसंज्ञके दिने
कर्तव्यतया पशुयागाङ्गानि पशूपाकरणादीनि पठितानि । पशुया-
गस्तु न तत्रोत्पन्नः । अपितु ततोऽपि प्रपूर्वदिनसाध्यक्रयप्रकरणे ।
एवं सति अयन्दैक्षो नाम 'पशुयागः ' स एष औपवसथ्येऽहन्या-
लब्धव्य ' इति वचनेन सुत्यादिनपूर्वदिनेऽनुष्ठेयः । एवञ्चास्य पशु-
यागस्य तत्रत्यपशुधर्माणाञ्चैकस्मिन्दिनेऽनुष्ठानेन सन्निधानादङ्गाङ्गि-

Digitization by Arya Samaj Charitable Foundation, Chennai

नात् सान्नाय्यपात्रप्रोक्षणाङ्गत्वम् । समाख्या संज्ञा । यथा अध्वर्युकाण्डप्रतिपादिते कर्मजाते आध्वर्यवसमाख्यावशादध्वर्योः कर्तृत्वेनाङ्गत्वम् । तथा 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिषु काम्येष्टिसमाख्यातेषु ऐन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशात् 'उभावामिन्द्राग्नी' इत्यादीनां याज्यानुवाक्यात्वेन विनियोगः । विनियोगो नामाङ्गत्वेनान्वयः ॥

श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम् उत्तरोत्तरस्य दौर्बल्यम् । यथा 'कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यग्निहोत्रप्रकरणे श्रूयते । तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपाल्लिङ्गादिन्द्रोपस्थानाङ्गत्वे प्राप्ते 'ऐन्द्र्ये' ति तृतीयाश्रुत्या 'गार्हपत्य' मिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानाल्लौङ्गिक इन्द्रोपस्थाने विनियोगो बाध्यते । श्रुतिर्हि स्वतो विनियोजिका । लिङ्गन्त्विन्द्रप्रकाशनसामर्थ्यमालोच्य 'ऐन्द्र्येन्द्रमुपतिष्ठते' इति श्रुतिकल्पनाद्वारा विनियो-

---

भावो गृह्यत इत्यनुष्ठानसादेश्यमिदम् ॥ संज्ञेति ॥ यौगिकशब्द इत्यर्थः ॥ इयमपि समाख्या द्विविधा वैदिकी लौकिकीच । 'प्रैतु होतुश्चमस' इत्यादिराद्या । ग्रन्थकृदुदाहृताऽनन्तरा ॥ तत्राद्योदाहरणे कर्तुरङ्गत्वम् । द्वितीये मन्त्राणाम् । व्युत्पत्तयेऽनेकोदाहरणम् ॥

श्रुतिलिङ्गयोः समावेशस्थलमुदाहृत्य श्रुतेः प्राबल्यमुपपादयति । यथेति ॥ कल्पनद्वारेति ॥ इदमत्र बोध्यम् । उत्तरोत्तरं प्रमाणं पूर्वपूर्वं प्रकल्प्यैवाङ्गत्वं ग्राहयति न तु स्वातन्त्र्येण । समा-

Digitization by Vasishtha Tripathi Collection Foundation, Chennai

जकमिति वाच्यम्, तच्चात्र न सम्भवति। यत्र श्रुतिविनियोगो नास्ति 'अग्नये जुष्टं निर्वपामी'त्यादौ तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्य 'अनेन मन्त्रेण निर्वापं कुर्या'दिति श्रुतिकल्पनाद्वारा लिङ्गं विनियोजकं भवत्येव, श्रुतिकल्पनाप्रतिबन्धकाभावात्। तथा 'स्योनन्ते सदनं कृणोमि तस्मिन् सीदे'त्यत्र 'तस्मि'न्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानाद्वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति। लिङ्गेन तु भिन्नमन्त्रत्वं भाति। आद्यस्य सदनप्रकाशकत्वात्। 'तस्मिन् सीदे'त्यस्य सादनप्रकाशकत्वात्। तत्र वाक्यापेक्षया लिङ्गस्य

ख्यया पदार्थयोरुपस्थितयोः, तयोस्सन्निधौ कल्पिते, परस्परमाकाङ्क्षामुद्भाव्य, तद्वाचकपदयोस्समभिव्याहारं संपाद्य, तत्सामर्थ्यमनुसन्धायान्ततस्तृतीयादिश्रुतिं घटयित्वाऽङ्गत्वप्रतिसन्धानमिति। एवञ्चोत्तरोत्तरप्रमाणेन यावच्छ्रुतिपर्यन्तकल्पनयाङ्गत्वं बोध्येत ततः प्रागेव पूर्वपूर्वेणान्याङ्गत्वमवगम्यत इत्युत्तरोत्तरस्य पूर्वपूर्वेण बाध इति॥ यत्र पूर्वप्रमाणसमावेशः तत्रैवोत्तरस्याङ्गताग्राहकत्वाभावः न तु तदसमावेशेपीत्याशयेनाह। यत्रेति॥ प्रतिबन्धकाभावादिति॥ श्रुतिसंवलनेहि प्रबला सा लिङ्गेन श्रुतिकल्पनं बाधेत। न च प्रकृते तादृशी श्रुतिरस्तीति॥ बाधो द्विविधः प्राप्ताप्राप्तबाधभेदात्। बाध्यार्थप्रापकशास्त्रस्य क्लृप्तत्वे आद्यः। यथा क्लृप्ताहवनीयशास्त्रप्राप्ताहवनीयस्य पदशास्त्रेण बाधः। सोऽयं दाशमिकः। बाध्यार्थप्रापकशास्त्रकल्पनस्यैवासिद्धौ द्वितीयः। यथा प्रकृते 'कदाचने' त्यादिमन्त्रस्येन्द्रोपस्थानाङ्गत्वग्राहकश्रुतेरेवासिद्धत्वात्, तत्र गार्हपत्योप-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राबल्याद्वाक्यं बाधित्वा लिङ्गेन 'स्योनन्त' इत्यस्य सदनाङ्गत्वम्, 'तस्मिन् सीदे'त्यस्य सादनाङ्गत्वमिति निर्णयः। 'स्योनन्त' इत्यस्य 'तस्मिन् सीदे'त्यनेनैकवाक्यत्वबलाद्यथाकथञ्चित् सादनसामर्थ्यरूपं लिङ्गं कल्पयित्वा अनेन विशष्टमन्त्रेण सादनं कुर्यादिति श्रुतिः कल्पनीया। सदनप्रकाशनरूपप्रत्यक्षलिङ्गेन कल्पितया 'स्योनन्त' इत्यनेन सदनं कुर्यादिति श्रुत्या 'स्योनन्त' इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैराकाङ्क्ष्याद्वाक्यप्रमाणात् लिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिबध्यते विलम्बितत्वादिति लिङ्गेन वाक्यस्य बाधः। एवं वाक्येन प्रकरणस्य, प्रकरणात् क्रमस्य, क्रमात् समाख्याया

स्थानाङ्गत्वग्राहकश्रुत्या बाध इतीदमत्रानुसन्धेयम् ॥ यथाकथञ्चिदिति। साक्षात्सादनप्रकाशक 'सीदे'तिपदार्थान्वित 'तस्मिन्' पदार्थपरिचायकत्वेन परम्परयेत्यर्थः ॥ एवमिति ॥ सूक्तवाके श्रुतं 'इन्द्राग्नी इदं हविरजुषेतां महोज्यायोऽक्राता'मिति। तत्र लिङ्गात्ताव 'दिन्द्राग्नी' पदस्य दर्शाङ्गत्वं सिद्धम्। तत्समभिव्याहाररूपवाक्यात् 'इद'मित्यादिपदानामपि दर्शाङ्गत्वमेव। न तु प्रकरणात्पूर्णमासाङ्गत्वमपीति वाक्यात्प्रकरणस्य बाधः। यद्वा 'संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपती'तीदमत्रोदाहरणम्। तत्र हि पौर्णमास्यङ्गत्वग्राहकेण पौर्णमासीपदसमभिव्याहारात्मकेन वाक्येन वैमृधस्योभयाङ्गत्वग्राहकं प्रकरणं बाध्यत इति ॥ प्रकरणादिति ॥ यथा राजसूये विदेवनादीनां प्रकरणाद्राजसूयाङ्गत्वमेव। न तु सचि-

Digitization by Arya Samaj Charitable Foundation, Chennai

बाधो वेदितव्यः । तथा श्रुत्या वाक्यादेरपि बाधः ॥

तदेवमङ्गतावोधकप्रमाणानि श्रुत्यादीनि निरूपितानि ॥

तच्चाङ्गत्वं शेषत्वं पारार्थ्यमिति यावत् । परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम् । प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तकृतिव्याप्यत्वात् लक्षणसङ्गतिः । दर्शादेः प्रयाजाद्युद्देशेन

धिनाऽभिषेचनीयसंज्ञकराजसूयान्तर्गतकर्मविशेषमात्राङ्गत्वमिति ॥ क्रमादिति ॥ यथा सन्निधिना सान्नाय्यपात्रमात्राङ्गत्वं 'शुन्धध्व' मित्यादिमन्त्रस्य। नतु पौरोडाशिकसमाख्याते काण्डे समाम्नाततया पुरोडाशपात्राङ्गत्वमिति ॥ एवं द्वित्र्यन्तरितप्रमाणेष्वप्युक्तवाध्यबाधकभावप्रकारमतिदिशति । तथेति ॥

प्रकरणमुपसंहरति । तदेवमिति ॥ यद्वा अनुपदमङ्गत्वलक्षणं कथयिष्यन् कथन्तत्प्रागेव नोक्तमिति शङ्कापरिहाराय 'मानाधीना मेयसिद्धि' रिति न्यायं द्योतयन्नाह । तदेवमिति ॥

तच्चेति ॥ उक्तप्रमाणप्रमेयमित्यर्थः । शेषत्वमङ्गत्ववदखण्डत्वात् न लघु बुद्धिमारोहति नवाऽङ्गत्वस्वरूपं विशदं प्रतिपादयितुं प्रभवतीति सूत्रोक्तं तद्रूपमाह । पारार्थ्यमिति ॥ किं पारार्थ्यं तदाह । परेति ॥ परः उत्कृष्टः स्वेतरोवा स्वर्गादिः अर्थः स्वविषयप्रवृत्त्युद्देश्यः यस्य तत्वमिति विग्रहादयमर्थो लभ्यते ॥ प्रवृत्तेति स्पष्टार्थत्वाय ॥ व्याप्यत्वं साध्यत्वम् विषयत्वम् ॥ परोद्देशेनेत्यस्य व्यावृत्तिमाह । दर्शादेरिति ॥ तथाच यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यत्र तत्र तदङ्गत्वमिति फलितम् ॥ अत्र कालादावङ्गेऽव्याप्तिवारणाय व्याप्यत्वं कारकत्वार्थकं वाच्यम् ॥ दर्शादेः प्रयाजा-

Digitization by Arya Samaj Charitable Foundation, Chennai

BVBSSMV

तकृतिविषयत्वाभावान्नातिव्याप्तिः । केवलप्रयाजादीनु-
द्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः ॥

तान्यङ्गानि द्विविधानि सन्निपत्योपकारकाणि आरादुपकार-
णिचेति । यान्यङ्गानि साक्षात् परम्परया वा प्रधानयाग-
रीरं निष्पाद्य तद्द्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि सन्निपत्यो
पकारकाणि । यथा व्रीह्यादिद्रव्याणि तत्संयुक्तावहननप्रोक्षणा-
नि अग्न्यादिदेवता तत्संयुक्तयाज्यानुवाक्यानुवचनादीनि
। अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा अवहननादेस्तुषविमो-

द्युद्देश्यककृतिनिरूपितत्वविशिष्टविषयत्वाभावरूपविशिष्टाभावप्रयोजकं
प्रयाजाद्युद्देश्यककृत्यभावरूपं विशेषणाभावमुपपादयति । केवलेति ॥
फलानुबन्धरहितेत्यर्थः ॥ यद्वा ननु केवलप्रयाजमात्रानुष्ठाने तत्र
निरुक्तलक्षणं नास्तीति लक्षणमेतदव्यापकमिति शङ्कापरिहाराय ता-
दृशानुष्ठानाप्रसिद्धिमाह । केवलेति ॥

सन्निपत्येति ॥ साक्षादित्यर्थः । साक्षात्त्वञ्च उत्पत्त्यपूर्व-
जननानुकूलयागनिष्ठयोग्यतोपयोगित्वात् ॥ आरादिति ॥ व्यव-
धानेनेत्यर्थः । तच्च परमापूर्वजननानुकूलोत्पत्त्यपूर्वनिष्ठयोग्यतोपयो-
गित्वादित्यवगन्तव्यम् ॥ साक्षात्परंपरयावेत्यत्र साक्षादित्यस्योदाह-
रणं व्रीह्यादिद्रव्याणीति अग्न्यादिदेवतेतिच ॥ तत्संयुक्ते-
त्यादितु परम्परयेत्यस्य ॥ अत्र व्रीह्यादीत्ययं अतद्गुणसंविज्ञानो
बहुव्रीहिः । दधिमधुघृतादिकमाद्यर्थः ॥ उक्तमेव विविच्य दर्शयति।
अत्रेति ॥ व्रीहिप्रोक्षणेनापि चेतन एव संस्क्रियते । तत्रैवादृष्टमुत्प-
द्यते । न तु व्रीहिषु । तस्य चेतनैकसमवायित्वादिति न्यायविदो

Digitization by Arya Samaj Charitable Foundation, Chennai

कादिरूपदृष्टद्वारा व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वम्। तद्द्वारा यागशरीरतदुत्पत्त्यपूर्वहेतुत्वञ्च। याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्त्तकत्वम्। तद्द्वारा तदुत्पत्त्यपूर्वोपयोगित्वञ्च । यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात्, द्रव्यदेवते हि यागस्वरूपमिति सिद्धान्ताच्च। एतान्येव सामवायिकानीत्युच्यन्ते । आत्मसमवेतापूर्वजनकान्यारादुपकारकाणि। यथा प्रयाजाज्यभागानूयाजादीनि। एतानि द्रव्यगतं देवतागतं वा संस्कारं न जनयन्ति किन्त्वात्मगतमदृष्टं जनयन्तीत्यारादुपकारकाणि ॥

मन्यन्ते । तदेतत्तान्त्रिकाणामनभिमतमिति द्योतयन्नाह । व्रीहिगतेति ॥ अन्यथा व्रीहीणां श्रुतं कर्मत्वम् नोपपद्येतेति दिगिति भावः॥ देवतायास्साक्षाद्यागशरीरनिर्वर्तकत्वे हेतुमाह । यागस्येति ॥ तावता यागविशेषणत्वमस्तु न तु तच्छरीरनिर्वर्तकत्वमिति चेदाह । द्रव्येति ॥ तदिदमुक्तं सूत्रकृता 'यजतिचोदना द्रव्यदेवताक्रिय' मिति ॥ एतानीति ॥ समवायः यागेन साक्षात्संबन्धः तत्र भवानि तद्वन्ति यानि तानि सामवायिकानि ॥ अत्र वदन्ति— अयं सन्निपत्योपकारकारादुपकारकभेदेन विभागः । क्रियारूपाणामेवाङ्गानां प्रामाणिकः । सन्निपत्येति अङ्गभूतेषु द्रव्येषु संबध्येत्यर्थकम् । आरादित्यपि साक्षादित्यर्थकम् । सामवायिकानीति द्रव्यादिसंबन्धमनुभूयेत्यर्थः । तदत्र द्रव्यदेवतानां सन्निपत्योपकारकत्वकथनं चिन्त्यमिति ॥ आत्मेति ॥ न च कर्तृसंस्कारेषु कर्त्रात्मगतापूर्वजनकेषु अतिव्याप्तिरिति शङ्क्यम् । संस्कारजन्यातिशयस्य प्रयाजादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्र सामान्यतः कर्म द्विविधम् । अर्थकर्म गुणकर्म चेति । तत्रात्मगतापूर्वजनकं कर्म अर्थकर्म । यथा अग्निहोत्रदर्शपूर्णमासप्रयाजादिकम् । गुणकर्म संस्कारजनकम् । तच्च द्विविधम् । उपयुक्तसंस्कारकमुपयोक्ष्यमाणसंस्कारकञ्चेति । तत्र उप-

---

जन्यं संस्कृत्यतिशयपदाभिधानानर्हमपूर्वमपेक्ष्य विजातीयत्वात् ॥

द्विविधन्तावत् कर्म वैदिकं लौकिकमिति । तत्र प्रवृत्त्यात्मकं वैदिकमपि द्विविधं क्रत्वर्थं पुरुषार्थमिति । स्वयम्प्रार्थितफलकन्द्वितीयम् । अन्यदाद्यम् । इदमपि द्विविधं, आरादुपकारकं सन्निपत्योपकारकमिति । तदेतद्द्वयमप्यङ्गमेवेति अङ्गप्रस्तावे निरूपितम् । पुनरपि सन्निपत्योपकारकं विशिष्य निरूपणीयम् । अतस्तदानुगुण्येन वैदिककर्म विभजते । तत्रेति ॥ सामान्यत इति ॥ क्रत्वर्थत्वपुरुषार्थत्वात्मकं अङ्गाङ्गिभावात्मकं वा विशेषमनाकलय्येत्यर्थः ॥ अर्थभूतं द्रव्योपादानोद्देश्यभूतं कर्म अर्थकर्म । प्रधानकर्मेति यावत् । गुणभूतं अप्रधानभूतं कर्म गुणकर्म । प्राक्तने वैदिककर्मविभागे फलगतस्वयंप्रार्थितत्वतदभावौ नियामकौ । इह तु द्रव्यकर्मणोः परस्परापेक्षे प्राधान्याप्राधान्ये, अपूर्वसंस्कृतिजनकत्वं वा तथेति विवेक्तव्यम् । तदिदं गुणकर्म सामान्यतो द्विविधं, स्वतन्त्रं क्रत्वर्थमिति । तदेतदनुपदं ग्रन्थकृता दर्शयिष्यते । तत्र क्रत्वर्थगुणकर्मेति सन्निपत्योपकारककर्मेति चाभिन्नार्थवाचिनाविमौ शब्दौ । इदमपि सन्निपत्योपकारकं त्रिविधं, दृष्टार्थमदृष्टार्थमुभयार्थमिति । तत्र दृष्टार्थसन्निपत्योपकारकरूपं गुणकर्म विभज्य दर्शयति । तच्चेत्यादिना ॥ उपयुक्तस्यापि पुनरुपयोगो यद्यस्ति न तदा तस्य प्रतिपत्तिरित्यत आह ।

Digitization by Arya Samaj Charitable Foundation, Chennai

युक्तसंस्कारकं प्रतिपत्तिकर्म । उपयुक्तस्य आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिरिति प्रतिपत्तिलक्षणात् । यथा इडाभक्षणकृष्णविषाणाप्रासनचतुरवत्तहोमादिकम् । नन्विडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तम् । होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावात् कथं प्रतिपत्तित्वम् ? होमस्य यागसमानकालीनत्वेन होमसंस्कार्यस्य चतुरवत्तादेरुपयुक्तत्वाभावादिति चेत् । अत्राहुः । उपयुक्तसंस्कारमात्रं प्रतिपत्तिः न तु प्रधानयागोपयुक्तत्वं विवक्षितम् । तथा सति पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालकर्त्तव्यस्य लोहितशकृन्निरसनस्य प्रतिपत्तित्वा-

---

आकीर्णकरस्येति ॥ यज्ञदेशं आकीर्णं व्याप्तं व्याकुलं करोति यत्तस्येत्यर्थः ॥ इडेति ॥ हुतशिष्टं हविर्भक्षणाय पात्रविशेषे निक्षिप्तमिडेत्युच्यते ॥ कृष्णेति ॥ ' कृष्णविषाणया कण्डूयत ' इति यजमानकण्डूयनाङ्गत्वेन विहितायाः कृष्णविषाणायाः ' नीतासु दक्षिणासु चात्वाले कृष्णाविषाणां प्रास्यती ' ति दक्षिणादानानन्तरं विहितं प्रासनम् ॥ उपयुक्तसंस्कारकमित्यनेन संस्कारे उपयोगोत्तरकालिकत्वं लभ्यते । तदुक्तचतुरवत्तहोमे न सम्भवतीति शङ्कते । नन्विति ॥ साक्षात्परम्परया वा प्रधानयागसम्बन्धियत्किञ्चिदुपयोगोत्तरकालिकत्वमात्रं विवक्षितम् । तदेतदुक्तहोमस्थलेऽप्यबाधितमिति समाधास्यन् शङ्कितुरभिप्रेतस्य उपयोगे प्रधानयागसम्बन्धित्वस्य विवक्षणासम्भवं प्रदर्शयति । अत्राहुरिति ॥ प्रधानयागप्राक्कालिकत्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

भावप्रसङ्गात् । यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात् । तथा कृष्ण-विषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात् । यागाङ्गभूतकण्डू-यनोपयुक्तत्वेऽपि यागोपयुक्तत्वाभावात् । अतो यत्र क्वचनोप-योगमात्रं विवक्षितम् । यत्र क्वचिदुपयोगस्तत्राप्यस्ति । वपाहृदया-द्युद्धरणेनोपयुक्तस्य पशोः सम्बन्धिनः शकृल्लोहितस्याकीर्णक-रस्य प्रतिपत्त्यपेक्षत्वात् । एवं यथाकथञ्चिदुपयोगो होमस्थले-ऽप्यस्ति । तथाहि–प्रतिपत्तिस्त्रिविधा; प्रधानोत्तरकाला प्रधान-समकाला प्रधानपूर्वकाला चेति । तत्राद्या इडाभक्षणादिका । द्वितीया होमादिका । तथाहि–दर्शपूर्णमासप्रकरणे श्रूयते 'सकृ-दुपस्तृणाति', 'द्विर्हविषोऽवद्यति', 'सकृदभिघारयति,' 'चतु-रवत्तं जुहोती'ति । तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्त-द्रव्यं तत्साधनत्वेन न विधीयते । होमस्य अप्राप्तत्वेनानुवादास-

---

सूचयितुमुद्धरणकालकर्तव्येति ॥ प्रसङ्गादिति ॥ तथाच वक्ष्य-माण 'पशावनालम्भादि'ति चातुर्थिकाधिकरणसिद्धान्तविरोधइति भावः ॥ तथेति ॥ एतदपि चतुर्थद्वितीये 'उत्पत्तौ येन संयुक्त'मि-त्यत्र निरूपितम् ॥ तत्रापि लोहितशकृतोरपि ॥ तथाहीति ॥ यद्य-प्यत्र चतुरवत्तहोमगतस्य यथाकथञ्चिदुपयोगस्य प्रतिपादनमेव समु-चितम् । तथाऽपि चतुरवत्तहोमस्योपयुक्तसंस्कारकत्वरूपं प्रतिप-त्तित्वं कामं मास्त्वितीष्टापत्तिरेव कथन्नसम्भवतीति शङ्कापरिहारा-याभियुक्तसम्मतेन पथा प्रतिपत्तिं विभजन्प्रथमन्तस्य प्रतिपत्तित्व-न्दृढीकरोति । प्रतिपत्तिरिति ॥ नन्वस्य गुणकर्मत्वमेव सन्दिग्धं कुतः प्रतिपत्तित्वं । अतस्तत्साधयति । तथाहीति ॥ असम्भवा-

Digitization by Arya Samaj Charitable Foundation, Chennai

म्भवात् । न च 'यदाग्नेय' इति वाक्याद्धोमप्राप्तिः । तद्वाक्यस्य यागविधायकत्वेन होमविधायकत्वाभावात् । न च यागहोमयोरभेद इति वाच्यम् । देवतोद्देशेन द्रव्यत्यागस्य यागशब्दार्थत्वात्, प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात् । तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपांशस्याप्राप्तत्वेनानुवादासम्भवात् । किन्तूपस्तरणद्विरवदानाभिघारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो 'जुहोती'त्यनेन विधीयते । स च संस्कारः प्रतिपत्तिरूप एव । 'अग्नये जुष्टमभिघारयामी' । त्यादिनिर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षतया तदवयवद्रव्यवदानकर्मक-

---

दिति ॥ उद्देश्यत्वं यत्र तत्रानुवाद्यत्वमावश्यकम् । अनुवादस्तु मानान्तरेण प्राप्तस्य पुनः कथनरूपइत्युक्तपूर्वम् ॥ देवतेति ॥ देवतोद्देशद्रव्यत्यागोभयपर्याप्तं यागत्वम् । प्रक्षेपस्तद्वयमिति त्रितयपर्याप्तं होमत्वम् ॥ एवमौपोद्घातिकमवान्तरार्थमुपसंहरति । सचेति । प्रकृतं यथा कथञ्चिदुपयोगन्दर्शयति । अग्नय इति ॥ यद्यप्यत्र न द्रव्यस्याग्न्युद्देशेन त्यागः तथाऽपि चतुर्थ्यास्तादर्थ्यपरत्वादनेन मन्त्रेण प्रकृतद्रव्यस्याग्न्यर्थत्वज्ञानं जन्यत इति तादृशज्ञानोपयोगेनैव होमप्रतिपाद्यद्रव्यस्योपयुक्तत्वान्निर्वहतीत्याशयवानाह । यथाकथञ्चिदिति ॥ अपेक्षतयेति ॥ यद्यपि यागपदाभिधेयदेवतोद्देश्यकद्रव्यत्यागानुष्ठानात्प्राक् न द्रव्यस्य प्रतिपत्त्यपेक्षेति बाधितमिवेदम्भाति, तथाऽप्येतन्मन्त्रपठनकाले प्रधानयागस्यापि स्मरणात् तदुपयुक्तन्द्रव्यमिदं कुत्र प्रक्षेप्तव्यमिति प्रतिपत्तेः प्रधानकालकर्त-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रक्षेपस्य प्रतिपत्तिकर्मत्वौचित्यात्। स च संस्कारः प्रधानसमकालः। होमो हि 'वषट्कृते जुहोती'ति विधानात् वषट्कारोत्तरक्षणे अध्वर्युणा कर्त्तव्यः। यागोऽपि तस्मिन्नेव क्षणे यागस्य स्मरणार्थेन वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्यौगपद्यसम्भवात्। तदिदं सर्वप्रदानाधिकरणवार्त्तिके स्थितम्। प्रधानपूर्वकाला प्रतिपत्तिर्यथा 'शकृत् संप्रविध्यति,' 'लोहितं निरस्यती'ति शकृत्संप्रवेधनलोहितनिरसने। इदमपि 'पशावनालम्भाल्लोहितशकृतोरकर्मत्वम्' इत्यधिकरणे स्थितम्॥

उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः। साक्षाद्विनियुक्तसंस्कारः, साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः, विनियोक्ष्यमाणसंस्कारश्चेति। तत्राद्यो यथा 'व्रीहीनवहन्ती'त्यादौ 'व्रीहिभिर्यजेते'ति साक्षाद्विनियुक्तव्रीह्यादीनां संस्कारोऽवघातादिरूपः। द्वितीयो यथा–'वत्समालभेते'ति दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्योपकारको यो वत्सस्तत्संस्कारकमिदमालम्भनम्। तृतीयो यथा–'तप्ते पयसि दध्यानयती'त्यत्र 'सा वैश्वदेव्यामिक्षे'तिवाक्येन तच्छब्देन निर्दिश्य वैश्वदेवया-

---

व्याया अपि पूर्वमेवापेक्षासम्भवो न विरुध्यतइति द्रष्टव्यम्॥ द्वितीया होमादिकेत्युक्तं प्रधानसमकालत्वमुपपाद्य सङ्गमयति। सचेति॥ उक्तार्थस्य प्रामाण्यन्दृढयितुमाह। तदिदमिति॥ विभक्तायाः प्रतिपत्तेस्तृतीयां विधामुदाहरति। प्रधानेति॥

आलम्भनमिति॥ दोहनार्थत्वादिदमपि दृष्टार्थमेव॥

Digitization by Arya Samaj Charitable Foundation, Chennai

गाङ्गत्वेन विनियोक्ष्यमाणं यत् पयस्तत्संस्कारकत्वाद्विनियोक्ष्यमाणसंस्कारकं दध्यानयनम् ॥

पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थः। त्यागांशे अदृष्टार्थश्च । अत्र तत्संस्कार्याग्नीषोमदेवताया वपायागे उपयुक्तत्वात् । हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च ।

एवं दृष्टार्थं क्रत्वर्थगुणकर्म निरूपितम् । अदृष्टार्थन्तु तत् 'व्रीहीन्प्रोक्षती' ति विहितम्प्रोक्षणम्, 'स्थाणौ स्थाण्वाहुतिञ्जुहोती' ति विहिता यूपसंस्कारार्था स्थाण्वाहुतिश्च ॥ उभयार्थन्तु तदाश्रयिकर्मापरपर्यायं स्वयमुदाहरति । **पश्विति ॥ संस्कारार्थ इति** ॥ उद्देशांशइति शेषः ॥ अनेन दृष्टार्थत्वमुक्तम् ॥ अंशान्तरेऽदृष्टार्थत्वमाह । **त्यागेति** ॥ 'उपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थ' इत्यनेनोक्तं देवताया उपयुक्तत्वं उपयोक्ष्यमाणत्वञ्चोपपादयति । **अत्रेति** ॥ **उपयोक्ष्यमाणत्वाच्चेति** ॥ तत्संस्कारार्थत्वं युक्तमिति शेषः ॥ अत्र, दैक्षे पशुयागेऽग्नीषोमदेवत्ये पशोर्विशसनानन्तरं तद्वपामुद्धृत्य प्रथममग्नीषोमदेवतोद्देशेन वपायागः क्रियते । अनन्तरं 'अग्नीषोमस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपती' ति वाक्यविहितः पशुयागाङ्गभूतः तत्समानदेवत्यः पुरोडाशद्रव्यको यागोऽनुष्ठीयते । पश्चात् पशोर्हृदयजिह्वावक्षःप्रभृतीन्यङ्गान्यादायाग्नीषोमदेवतोद्देशेन याग इत्यनुसन्धेयम् ॥ तदिदमाश्रयिकर्म त्रिविधम् । तत्र त्यागांशेनादृष्टार्थत्वे त्रयाणां समाने किञ्चिदुद्देशांशेन दृष्टार्थं प्रक्षेपांशेन त्वदृष्टार्थम् । यथोदाहृतः पशुपुरोडाशयागः। किञ्चित्तु प्रक्षेपांशेन दृष्टार्थं उद्देशांशेन त्वन्यार्थम् । तामेतां विधा-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्विष्टकृद्यागो द्रव्यांशे देवतांशे च उपयुक्तसंस्कारार्थः । त्यागांशे अदृष्टार्थश्च । सूक्तवाकसाधनकप्रहरणमपि तथैव । उत्तमप्रयाजो यक्ष्यमाणदेवतासंस्कारत्वात्तदंशे उपयोक्ष्यमाणसं-

---

मुदाहरति । **स्विष्टेति** ॥ नात्रदेवतासंस्कारोऽपि । स्विष्टकृतः देवताविशेषस्य पूर्वमुत्तरत्र वाऽनुपयोगात् ॥ अतएव 'देवतांशेचे' ति स्विष्टकृद्यागसाधनीभूतमन्त्रजन्यस्मृत्या प्रधानयागदेवतायां केवलाग्निरूपायां यःसंस्कारो जन्यते तत्तात्पर्येण । प्रासङ्गिकञ्च तत्कथनं व्युत्पादनाय ॥ किञ्चित्पुनराभ्यामुभाभ्यामप्यंशाभ्यां दृष्टार्थम् । तां विधामुदाहरति । **सूक्तवाकेति** ॥ दर्शपूर्णमासयोः 'सूक्तवाकेन प्रस्तरं प्रहरती' ति सूक्तवाककरणकः प्रस्तरद्रव्यकः प्रहरतिलक्ष्यो होमो विहितः । "सूक्तवाको नामेष्टदेवतानुकीर्तनार्थः 'इदन्द्यावापृथिवी' त्यनुवाक" पठितो मन्त्रविशेषः । एतन्मन्त्रप्रकाश्या एवास्मिन्प्रस्तरहोमे देवताः । एताश्च प्रधानयागेषूपयुक्ताः । प्रस्तरोऽपि हविर्धारण उपयुक्तः । तदेवमसौ होमः उद्देशांशेन प्रधानदेवताः, प्रक्षेपांशेन प्रस्तरञ्च संस्करोतीति अंशद्वयेनाप्यस्य दृष्टार्थत्वमिति ॥ **तथैव** ॥ द्रव्यांशे देवतांशेचोपयुक्तसंस्कारार्थ एव ॥ आसान्तिसृणां विधानां स्पष्टप्रतिपत्तये पुनः क्रमेण स्थलान्तराण्युदाहरति । **उत्तमेति** ॥ उत्तमः अन्तिमः 'स्वाहाकारं यजती' ति वाक्यविहितः ॥ अस्याग्न्यादिदेवत्यत्वात् अग्न्यादीनाञ्चाग्नेयादिप्रधानयागेषूपयोक्ष्यमाणत्वादुद्देशांशेन दृष्टार्थत्वम् ॥ प्राक्तनप्रथमोदाहरणे देवता उपयुक्तोपयोक्ष्यमाणोभयात्मा अत्रोपयोक्ष्यमाणैवेति

Digitization by Arya Samaj Charitable Foundation, Chennai

स्कारः । इतरांशे अदृष्टार्थः । हृदयादिहविर्यागात्पूर्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिरितरांशे अदृष्टार्थ इत्याद्यूह्यम् । केचित्तु उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वम् । चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमानन्तरमुपयोक्ष्यमाणत्वाभावात् तद्भिन्नत्वं होमेऽस्तीति लक्षणसङ्गतिरित्याहुः ॥

अत्रायं विशेषः । अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्रा-

विशेषः ॥ द्वितीया विधा हृदयादीति ॥ पाककुम्भीस्थः पश्वङ्गरसो वसा । तत्साधनको होमो वसाहोमः । वसायाः पाकोपयुक्तत्वादस्य होमस्य प्रक्षेपांशेन दृष्टार्थत्वम् ॥ पूर्वं द्वितीयोदाहरणे द्रव्यं साक्षात्प्रधानयागोपयुक्तं प्रकृते न तथेति विशेषः ॥ आदिना प्रकाशोदाहृता तृतीया विधा ग्राह्या ॥ एवङ्गुणकर्म निरूपितम् । तत्र प्रधानसमकाले प्रतिपत्तिविशेषे होमरूपे उपयुक्तसंस्कारकत्वरूपं प्रतिपत्तित्वं दुर्घटमिति शङ्कित्वा यथाकथञ्चिदुपयोगस्य विवक्षितत्वेन सुघटमेव तदिति समाहितम् । तामेतामाशङ्कां, प्रतिपत्तिस्वरूपघटकमुपयुक्तत्वन्न स्वानुष्ठानप्राक्कालिकोपयोगशालित्वं येनोपयोगसमानकालिकस्य होमस्य स्वपदेन ग्रहणन्नघटेत, अपितु स्वानन्तरकालिकभिन्नोपयोगशालित्वन्तत् । तदिदं चतुरवत्तहोमस्थले उपयोगस्य साक्षात्प्रधानयागसम्बन्धित्वविवक्षणेऽपि, होमस्योपयोगसमानकालिकत्वेऽपिच निराबाधमिति परिहरतां केषाञ्चिन्मतमाह । केचित्त्विति ॥

अर्थकर्मगुणकर्मशब्दयोः प्रवृत्तिनिमित्तं प्रतिपादयन् तदर्थस्वरूपं विवेचयति । अत्रेति ॥ अर्थकर्मगुणकर्मणोरित्यर्थः ॥ विशेषो

Digitization by Arya Samaj Charitable Foundation, Chennai

धान्यम्। कर्माणि द्रव्यस्य गुणत्वम्। यथा अग्निहोत्रादौ दध्यादेर्गुणत्वम्। गुणकर्माणि द्रव्यस्य प्राधान्यम्। द्रव्ये च कर्मणो गुणत्वम्। यथा–'व्रीहीन् प्रोक्षति' 'अवहन्ती'त्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यम्। प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वमिति ॥

पुनरपि गुणकर्म चतुर्विधम्। उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात्। तत्रोत्पत्तिसंस्कारो यथा 'अग्नीनादधीते' ति। मन्त्रविशेषैः सम्भारेषु निधापिता आहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्वादाधानस्य उत्पत्तिसंस्कारत्वम्। आप्तिसंस्कारो यथा 'स्वाध्यायोऽध्येतव्य' इति अध्ययनेन स्वाध्याय आप्यत इत्याप्तिसंस्कारोऽयम्। विकृतिर्यथा 'व्रीहीनवहन्ती' ति। अत्र व्रीहिगतवैतुष्यरूपविकृतिजनकत्वादवहननं विकृतिसंस्कारः। संस्कृतिर्यथा 'व्रीहीन् प्रोक्षती' ति। अत्र प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजन-

---

भेदः ॥ नन्वेतत्कथनस्य विभागानन्तरमुभयनिरूपणानन्तरं वाऽवसरः न पुनरत्र। सत्यम्। 'इहवा वक्तव्यन्तत्रवेति नकश्चिद्विशेष' इति न्यायविदां समाचारः पर्यालोच्यताम् ॥

पुनरपीति ॥ तत्र तत्र द्वितीयोपात्तकर्मत्वभेदानुरोधेनायं विभागः ॥ उत्पत्तीति ॥ उत्पत्तिरात्मलाभः तत्करणात्कर्माप्युत्पत्तिः तदात्मकस्संस्कार इति ॥ संस्कारशब्दो गुणकर्मपर्यायोऽप्यस्ति ॥ नन्वग्नयो नोत्पद्यन्ते। उत्पद्यन्तइत्याह। मन्त्रेति ॥ आहवनीयेति ॥ सत्यं। उष्णस्पर्शाश्रयभूतन्तु वस्तूत्पद्यत इति न वयं ब्रूमः। अपित्वतिश-

Digitization by Arya Samaj Charitable Foundation, Chennai

कत्वात् संस्कृतिरूपगुणकर्मत्वम् । अत्राधानमध्ययनञ्च स्वतंत्रं गुणकर्म । न तु क्रत्वंगम् । प्रोक्षणादिकं सर्वं क्रत्वंगं गुणकर्मेति ध्येयम् ॥

अर्थकर्म त्रिविधम् । नित्यनैमित्तिककाम्यभेदात् । तत्र 'यावज्जीवमग्निहोत्रं जुहोति' 'सायं जुहोति' 'प्रातर्जुहोती'ति जीवता पुरुषेण सायंप्रातःकालयोर्नियमेन कर्तव्यतया अवगतमग्निहोत्रादिकं नित्यम् । 'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपे'दिति दर्शपूर्णमासातिपत्तिनिमित्तकपथिकृदिष्ट्यादिकं नैमित्तिकम् । नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव । कृते फलं

यविशेषावच्छिन्ना अग्नय उत्पद्यन्त इतीति भावः ॥ पुनरपि गुणकर्म द्विविधं स्वतन्त्रक्रत्वर्थभेदादिति सूचयन्नाह । अत्रेति ॥ प्रकाशकारस्तु 'वैदिकं कर्म चतुर्विधं उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् । तत्राद्यं यथा....यागादि च स्वर्गाद्युत्पत्त्यर्थ' मित्याह ॥

विभागवाक्ये अनन्तरनिर्दिष्टमपि गुणकर्म अङ्गत्वादङ्गप्रस्तावे निरूप्येदानीमर्थकर्म निरूपयितुमाह । अर्थेति ॥ अत्र प्रयाजाद्यङ्गभिन्नमर्थकर्म विवक्षितम् । अङ्गानां प्रधानानुरोधित्वेन स्वातन्त्र्येणैतद्विभागानन्तःपातित्वादिति ध्येयम् ॥ नित्येति ॥ नियतानिमित्तकत्वन्नित्यत्वम् । अनियतनिमित्तकत्वन्नैमित्तिकत्वम् ॥ आद्यद्वयसाधारणं प्रत्यवायजनकीभूताकरणप्रतियोगित्वरूपं काम्यापेक्षया विशेषमाह । नित्येति ॥ स्वान्वयव्यतिरेकव्यापकान्वयव्यतिरेकशाल्यनुष्ठानप्रयोजकत्वन्निमित्तत्वम् । एवञ्च निमित्ते सति अनुष्ठानस्यावश्यकत्वबोधनादकरणे प्रत्यवायोऽनुमीयत इति ॥ एवं प्रत्यवायभियाऽनुष्ठी

Digitization by Arya Samaj Charitable Foundation, Chennai

नास्तीति केचित् ! अन्ये तु दुरितनिवृत्तिः फलमस्ति । 'नित्य-नैमित्तिकैरेव कुर्वाणो दुरितक्षय' मित्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात् । न चैवं तयोरपि काम्यत्वापत्तिः फलवत्त्वादिति वाच्यम् । फलकामनापूर्वकमनुष्ठानाभावात् तत्तद्विधिवाक्ये फलकाममुद्दिश्य तदर्थफलसाधनत्वेन विधाना-

---

न्यमाने नित्ये नैमित्तिके वा कर्मणि तज्जन्यं फलं किञ्चिदस्ति न वा? प्राभाकरास्तावदाहुर्नेति । तन्मतमाह । कृत इति ॥ अयमाशयः— न तावत्फलं स्ववाक्ये श्रुतम् । नापि कल्प्यम् । स्वर्गफलकत्वस्यान्यतः प्राप्तत्वात् काम्यत्वानवगमाच्चेति ॥ अन्येत्वाहुरस्ति फलमिति तेषां मतमाह । अन्येत्विति ॥ अत्रापि 'कृत' इति सम्बध्यते ॥ यद्यपि न विश्वजिन्न्यायः तथाऽपि रात्रिसत्रन्यायोऽत्र प्रवर्तिष्यत इत्याह । नित्येति ॥ इत्यादीति ॥ 'ज्ञानञ्च विमलीकुर्वन्नभ्यासेन च पाचयेत् । अभ्यासाच्च क्वचिद्ज्ञानात् कैवल्यं लभते नरः ॥' इति मूलोक्तवैयासिकवचनशेषः आदिना गृह्यते ॥ फलजनकत्वं काम्यत्वमिति मन्वानम्प्रत्याह । नचैवमिति ॥ कर्मणः फलवत्त्वे फलकामनान्वयव्यतिरेकानुविधाय्यनुष्ठानकत्वापत्त्या श्रुतनिमित्तस्य स्वभावभङ्गप्रसङ्ग इति शङ्कितुरभिप्रायः ॥ नैमित्तिकस्थले फलसत्त्वेऽपि प्रवृत्तिप्रयोजकत्वन्निमित्तस्यैव । अत एव प्रवृत्तिप्रयोजककामनाविषयफलशालित्वं काम्यत्वमित्याशयेन समाधत्ते । फलेति ॥ ननु कथन्न यः कश्चिद्दुरितक्षयं कामयमानः प्रवर्तिष्यते । न हि कामना नियन्तुं शक्या । तथा च स्थितन्नित्यस्य काम्यत्वम् तत्राह । तत्तद्विधीति ॥ तथा च स्वविधिवाक्योपात्तफलसाधनत्वावच्छिन्नत्वं काम्यत्वम् । न च विश्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

भावाच्च काम्यत्वानुपपत्तेः । काम्यमपि कर्म त्रिविधम् । केवलमैहिकफलकम् केवलामुष्मिकफलकमैहिकामुष्मिकफलकञ्चेति । तत्राद्यं यथा–कारीर्यादि तत्तत्समयपरिशुष्यत्सस्यसञ्जीवनहेतुवृष्टिकामिना क्रियते । न कालान्तरभाविवृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा । केवलामुष्मिकफलकं यथा– स्वर्गाद्यर्थं दर्शपूर्णमासादिकं । स्वर्गस्य इह लोके भोग्यत्वाभावात् । ऐहिकामुष्मिकफलकं यथा– 'वायव्यं श्वेतमालभेत भूतिकाम' इति भूत्यादिफलकमित्यन्यत्र विस्तरः ॥

ननु दर्शपूर्णमासादिकर्मणां व्रीह्यादिद्रव्याणाञ्च प्रत्यक्षत्वेन लौकिकत्वात् कथं वेदस्यालौकिकार्थबोधकत्वमिति चेन्न। कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनत्वमप्रत्यक्षमिति तत्फलसाधनतया तत्कर्म कर्तव्यमित्येवं फलसाधनतया कर्मकर्तव्यताबोधकस्य वेदस्यालौकिकार्थबोधकत्वात् । एवं व्रीह्यादी-

---

जित्यव्याप्तिः । तत्राप्यध्याहारावश्यम्भावात् । एवन्तर्हि उक्तस्थलेऽपि काम्यत्वन्दुर्वारमिति चेत् फलकामनातिरिक्तप्रयोज्यानुष्ठानकभिन्नत्वं काम्यत्वमिति वक्तव्यमिति ॥

एवं विधयो निरूपिताः । क्वचित्कर्मविशेषनिरूपणस्य प्रासङ्गिकत्वात् । तत्तत्कर्मविशेषविधायकतया विधिवाक्यनिरूपण एव पर्यवसानाच्च । अथैतेषां विधायकत्वप्रकारोऽग्रे वर्तयिष्यते । विधायकत्वञ्चेदमनधिगतार्थगन्तृत्वं, अलौकिकार्थप्रमापकत्वं, शब्देतरप्रमाणानवगतार्थप्रमितिजनकत्वमिति स्थितमन्यत्र । तदेतद्विधायकत्वं केषुचिद्विधिषु न सम्भवतीत्याशंक्य परिहरति । नन्वित्यादिना ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नां यागादिक्रियासाधनत्वं न प्रत्यक्षवेद्यमिति तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न दोषः ॥

न प्रत्यक्षवेद्यमिति । इदन्तु बोध्यम् । यागो नाम देवतोद्देशेन द्रव्यत्याग इति विना शब्दं लोके परिज्ञानात् व्रीह्यादिद्रव्याणां यागसाधनत्वमपि प्रत्यक्षगम्यमेव । यद्यप्यस्मन्मते कारणत्वस्य प्रत्यक्षायोग्यनियमघटिततया न लौकिकप्रत्यक्षविषयत्वम्, तथाऽपि सम्बन्धिद्वयप्रत्यक्षेण धूमाग्न्योरिव यागद्रव्ययोरपि कार्यकारणभावोऽनुमानगोचर एवेति न तत्रावश्यं शब्दापेक्षा । अतएव 'सर्वे द्रव्यविधयो नियमविधय' इति सकलमीमांसकप्रवादः । न हि यागसाधनत्वस्य शब्दैकगम्यत्वे पक्षप्राप्तार्थविधायकत्वरूपं नियमविधित्वं सम्भवति । प्रोक्षणादेरिवापूर्वविधित्वस्यैवापत्तेः । तथा च 'न प्रत्यक्षवेद्य' मिति कथनमसङ्गतमिति ॥ तस्माद्व्रीह्यादिशास्त्राणामलौकिकार्थबोधकत्वमेवं वाच्यम् । सर्वत्र नियमविधिस्थले नियमापूर्वन्तावत् किञ्चिदवश्यमभ्युपगन्तव्यम् । अन्यथा हि द्रव्यान्तरेण यागानुष्ठानसम्भवे श्रुतद्रव्यशास्त्रन्निष्फलं स्यात् । अतश्शास्त्रमिदं स्वार्थवत्त्वाय व्रीह्यादिभिरेव यष्टव्यमिति नियमम् अस्याप्यर्थवत्त्वाय तदपूर्वञ्च स्वतात्पर्यगोचरमवबोधयतीति । तदेतन्नियमापूर्वप्रमापकत्वादलौकिकार्थबोधकत्वमिति कौस्तुभे विस्तरः । अत्र लोकत एव यागस्वरूपप्राप्तिमादाय कर्मविधीनामलौकिकार्थबोधकत्वभङ्गशङ्कापुरस्सरं विधेयतावच्छेदकरूपेणाप्राप्ततया नोक्तदोष इति साधितमिति विस्पष्टं प्रतीयमाने लौकिकानां दर्शपूर्णमासादीनां लौकिकफलकत्वमेवास्तु दण्डादीनामिव घटफलकत्वमिति वितर्कयन् तत्र सिद्धान्तमाहेति केषाञ्चिदविनीतां लेखिनीं

Digitization by Arya Samaj Charitable Foundation, Chennai

इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते । तत्र 'स्वर्गकामो यजेते' त्यत्र यजिधातोरुपरितने तप्रत्यये धर्मद्वयमस्ति । आख्यातत्वं लिङ्त्वं च । तत्र आख्यातत्वञ्च सर्वलकारसाधारणम् । तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्ति-रूपाम् अर्थभावनां प्रतिपादयति । साचार्थभावना किं केन कथमिति अंशत्रयविशिष्टा । तथा हि– यजेतेत्यत्र प्रथमं प्रत्य-येन भावयेदिति प्रतीयते । सुबन्ताभिहितानां सर्वेषां कारका-

---

हठादेव व्यापारयतामाहोपुरुषिकान्धानामवतारिका ॥

अथ विधिवाक्यानां विधायकत्वप्रकारम्प्रतिपादयिष्यन् तत्प्र-तिपादनमिदानीमेव प्राप्तावसरमित्याह । इदानीमिति ॥ विधिवा-क्यानामनेकभेदभिन्नानान्निरूपणानन्तरमित्यर्थः ॥ धर्मिज्ञानानन्तरमेव हि तद्गतधर्मविशेषविवेचनं शक्यं कर्तुमिति भावः ॥ यद्वा विधिषु प्र-दर्शितेषु तदेकदेशभूतन्नामधेयमनन्तरं प्रतिपादयितुम् 'तस्य कथं भावनान्वय' इत्याशंक्य 'भावनाकरणत्वेनाभिमतयागनामत्वेनान्वय' इति समाधास्यति । तत्र का भावना, किं करणत्वम्, कथं यागः करणमिति भवति जिज्ञासा । तत्परिज्ञानाय प्रथमतो भूमिमारचयति इदानीमिति ॥ विधिवाक्यनिरूपणानन्तरन्नामधेयनिरूपणात्पूर्वमित्य-र्थः ॥ अर्थेति ॥ अर्थयितुः पुरुषस्य भावना । तथाचासौ पुरुषसम-वेतप्रवृत्त्यभिधायी भावनाशब्दः ॥ इत्यंशेति ॥ इत्याकाङ्क्षात्रयशा-मकपदार्थत्रयरूपांशत्रयान्वयापेक्षिणीत्यर्थः॥ पदार्थत्रयविशिष्टभावना-रूपांश्यपेक्षमंशत्वम् ॥ वाक्ये सर्वत्र यद्यर्थभावनाया आख्यातेन प्रथ-ममुपस्थितिर्भवति, तदानीमेव सा अंशत्रयमपेक्षमाणा समभिव्याहृत-

Digitization by Arya Samaj Charitable Foundation, Chennai

णां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात् । तत्रापि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात् प्रथमं प्रत्ययार्थ-भावनाया उपस्थितिर्युक्ता । ततः करोतिसमानार्थकभावयतेः

पदार्थान् यथायथं गृह्णातीति युज्येत । इतरथा हि तस्या एवानुपस्थितौ कुत्रत्या अंशत्रयाकाङ्क्षा, कुतस्तरामनाकाङ्क्षितानामन्वयः । अतस्तदुपस्थितेः प्राथम्यं स्थापयति । **यजेतेत्यत्र प्रथममिति** ॥ ननु व्युत्पन्नस्य पुंसः प्राथमिकेन सोमादिपदेन सोमादेः प्रथममुपस्थितिरावश्यकी तत्राह । **सुविति** ॥ अयम्भावः— सत्यं प्रथममुपस्थितिस्सोमादेः । तथाऽपि तु सा सोमादेः कारकत्वात् क्रियान्वयमन्तराऽपर्यवसानाद्यावत् क्रियोपस्थिता भवति तावत् किमपि कर्तुमप्रभवन्ती नश्यति । अथत्वाख्यातेनोपस्थिता भावना उत्थितयोत्थाप्यया वाऽऽकाङ्क्षया पुनरुपस्थितान् समभिव्याहृतपदार्थानात्मसात्करोति । तदेवं साक्षादन्वयबोधानुकूलासूपस्थितिष्वर्थभावनोपस्थितेरेव प्राथम्यमिति। नन्वेवमपि सकलकारकाणान्धात्वर्थक्रियायामन्वयात् धातोराख्यातात्पूर्वं श्रवणाच्च धात्वर्थोपस्थितिः प्रथममिति युक्तम् तत्राह । **तत्रापि प्रकृतीति** ॥ **प्राधान्यादिति** ॥ 'भावप्रधानमाख्यातम्,' 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने' त्यादिनियामकवशेन धात्वर्थस्यापि सोमादीनामिव धात्वर्थातिरिक्ताख्यातार्थभूतार्थभावनाकारकत्वमवसीयतइति ॥ किमिति कर्माकाङ्क्षा भावनायां अकर्मकत्वे नयुज्यत इति सकर्मकत्वं साधयति । **करोतीति** ॥ यद्यपि करोतिसमानार्थो यततिरकर्मकः, तथाऽप्युत्सर्गोऽयं प्रकृतेऽनपवादः; प्रत्युत पचति पाकं करोतीति विवरणेनोपष्टभ्यत इत्याशयः।

Digitization by Arya Samaj Charitable Foundation, Chennai

सकर्मकत्वात् किं भावयेदिति कर्माकाङ्क्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेनान्वेति । दुःखात्मकस्य यागस्य ईप्सिततमत्वरूपकर्मत्वायोग्यत्वात् । स्वर्गस्यत्वानन्दात्मकत्वेन ईप्सिततमतया कर्मत्वेनान्वययोग्यत्वात् । ततश्च स्वर्गं भावयेदिति बोधो भवति । ततः केनेति करणाकाङ्क्षायां समानपदोपात्तो यागः करणत्वेनान्वेति । यागेन स्वर्गं कुर्यादिति । ततः कथं यागेन स्वर्गं कुर्यादिति कथम्भावाकाङ्क्षायामग्न्यन्वाधानावहननादिजन्यदृष्टोपकारेण प्रयाजादिजनितादृष्टोपकारेण च सहितेन यागेन स्वर्गं कुर्यादित्यग्न्यन्वाधानप्रयाजादिकमङ्गजातमितिकर्तव्यतात्वेनान्वेति । कथम्भावाकाङ्क्षापूरकत्वमितिकर्तव्यतात्वम् । यथा ओदनकामः पचेदित्यत्र लिङा भावना प्रतीयते । किंभावयेदित्याकाङ्क्षायामोदनो भाव्यत्वेनान्वेति । केनेत्याकाङ्क्षायां

भिन्नेति ॥ स्तो गौणश्रुती समानाभिधानश्रुतिरेकपदश्रुतिरिति । तत्र स्वर्गस्य कर्मत्वमवगमयति यत् समभिव्याहारात्मकं वाक्यं ततोऽपि बलवत्या यजेतेत्येकपदश्रुत्या यागस्य कर्मत्वौचित्येऽपीत्यपेरर्थः॥ दुर्बलमपि वाक्यं सामर्थ्येनोत्तभ्यतइत्याह । दुःखेति ॥ दुःखसाध्येति पाठे दुःखेन साध्यं यत्कर्म तदात्मकस्येत्यर्थः ॥ तत्र किं केन कथमित्याकाङ्क्षाक्रमेऽनुभवस्साक्षी ॥ कथम्भावाकाङ्क्षाशामकत्वं सन्निपत्योपकारकारादुपकारकाङ्क्षकलापस्यास्तीत्येतत्स्फुटीकरोति । अग्नीत्यादिना कुर्यादित्यन्तेन ॥ न केवलमयं तान्त्रिकैकप्रसिद्धो वाक्यार्थवर्णनप्रकार इति लौकिकदृष्टान्तद्वारा प्रतिपादयति । यथेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पाकेनेति लभ्यते । कथमित्याकाङ्क्षायां तृणफूत्कारादिसहितेनेति । ततश्च तृणफूत्काराद्युपकृतेन पाकेन तेजस्संयोगेन ओदनमभावयेदिति वाक्यार्थः सम्पद्यते । तद्वद्वेदेऽपि बोध्यः ॥

स एव लिङ्त्वावच्छेदेन शब्दभावनां प्रेरणाख्यामभिधत्ते । लोकेऽपि गामानयेत्याचार्यवाक्यश्रवणानन्तरमय-

---

पाकेनेति ॥ नचेदमनानुभाविकमिति संशयितव्यम् । देवदत्तः पचतीति केवलमुच्यमाने तथाऽननुभवेऽपि ओदनं पचतीत्यत्र तथाऽङ्गीकारस्यावश्यकत्वात् । न हि भवति ओदनं पाकं करोतीति ॥

भावना द्विविधा अर्थभावना शब्दभावनेति । तत्राद्या पुरुषगता प्रवृत्तिरूपा उक्ता । द्वितीयामाह ॥ सएवेति ॥ लिङ्प्रत्यय एवेत्यर्थः ॥ अभिधत्तइति ॥ नच भिन्नरूपेणापि युगपदर्थद्वयाभिधानं विरुद्धम् । 'अनुभूतिर्हि भगवती वस्तूपगमे नश्शरण'मिति ॥ ननु कथं वेदे लिङः शब्दभावनाऽपरपर्याये प्रेरणाख्ये प्रत्यक्षागोचरेऽर्थे शक्तिर्गृह्यताम् । लोकव्यवहारादेव । न हि वेदे शब्दोऽर्थो वा लोकाद्भिन्नः । आह हि 'य एव लौकिकाः शब्दास्त एव वैदिकाः त एवैषामर्था'इति । ननु लोक एव कथम् । तद्वक्ष्यति प्रेरणाज्ञानस्य चेत्यादिना प्रयोज्यवृद्धगतस्य प्रयोजकगतप्रेरणाविषयकज्ञानस्य नियमेन लिङ्श्रवणानुविधानात्तदवधारणमिति । तत्रापि पर्यनुयोगो भवति प्रयोज्यगतस्य प्रेरणाज्ञानस्य व्युत्पित्सोरप्रत्यक्षतया कथन्तेन तदवधारणमिति । तमेतन्निरसितुं प्रयोज्यगतगवानयनप्रवृत्त्या तद्गतं प्रेरणाज्ञानमनुमीयत इत्याह लोकेपीत्यादिना प्रवृत्तिकारणमित्यन्तेन ॥ अनन्तरमिति प्रवर्तत इत्यत्रान्वेति ॥ प्रेरयतीति ॥ प्रेरणा प्रवर्तना

Digitization by Arya Samaj Charitable Foundation, Chennai

माचार्यो मां गवानयने प्रेरयतीति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्तत इत्यन्वयव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रवृत्तिकारणम्। प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादि-श्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां शक्तिर्लोके गृह्यत इति वेदेऽपि तत्रैव शक्तिकल्पनौचित्यात् । इयांस्तु विशेषः— लोके गवानयनादिप्रवृत्त्यनुकूलः प्रेरणाख्यो व्यापारः प्रयोक्तृ-पुरुषगताभिप्रायविशेषः । वेदे तु प्रयोक्तृपुरुषाभावात् लिङादि-शब्दनिष्ठएव स इत्यङ्गीक्रियते । अत एव शब्दनिष्ठव्यापारत्वा-

---

विधिरिति पर्यायाः । सेयं प्रेरणा गामानयेत्यत्र लोटा प्रतिपाद्यत इति बालिशा अपि संविद्रते ॥ **व्यतिरेकेति** ॥ अयमंशः ज्ञात्वैवे-त्येवकारेण प्रत्यपादि ॥ **कारणमिति** । प्रवृत्तिर्द्विधा स्वेच्छया वा परप्रेरणया वा । न च प्रेरणास्थलेऽपीच्छाऽऽवश्यकीति वाच्यम् । आचार्यप्रेरितोऽहं करोमि न स्वेच्छयेति व्यवहारस्य दुरपह्नवत्वात् । तत्र प्रेरणोत्तरप्रवृत्तिं प्रत्येव प्रकृते कारणत्वं विवक्षितमिति न व्यभि-चारः। ननु विषं भुङ्क्ष्वेत्यादावस्ति प्रेरणाज्ञानं। न पुनः प्रवृत्तिः।सत्यम्। इष्टसाधनताज्ञानं तु कारणान्तरन्नास्ति । प्रत्युत बलवदनिष्टानुबन्धि-त्वज्ञानं तत्र प्रतिबन्धकं जागरूकमिति ॥ **लिङादीति** ॥ लिङ् लेट् लोट् कृत्येत्यर्थः ॥ **वेदेऽपीत्युक्तार्थम्** ॥ **प्रयोक्तेति** ॥ प्रयोक्तृत्वं यस्याभिधीयेत तथाविधस्य कस्यचित्पुरुषस्य नित्ये वेदेऽभावादि-त्यर्थः ॥ **शब्देति** ॥ शब्दनिष्ठत्वात् शाब्दत्वम् । व्यापारत्वात् भावनात्वमिति विवेकः । कथमस्या एव न प्रवर्तकत्वमिति तु न शङ्क्यम् । पुरुषस्थानीयलिङादेरेव तत्वात् तथात्वे व्यापारान्तर-

Digitization by Arya Samaj Charitable Foundation, Chennai

च्छाब्दी भावनेत्युच्यते । यागहोमादिविषयप्रवृत्तिहेतुत्वात् प्रवर्तना प्रेरणेतिचोच्यते ॥

कल्पनाप्रसङ्गाच्चेति राणके ॥

अथेयं शाब्दभावनानुबन्धिनी प्राचीनप्रक्रियाऽवहितेन मनसा परिचिन्तयितव्या—अर्थवादप्रामाण्याय शब्दभावनात्मनो विधेः प्राशस्त्यरूपोतिकर्तव्यताकाङ्क्षा उपपादनीया । सेयमाकाङ्क्षा शब्दभावनाया विधानद्वारा कर्तव्यताबोधन एव घटते । 'सोमेन यजेते' त्यादौ यागादिविशिष्टार्थभावनाया विधिविषयत्वेन कर्तव्यताबोधनादेव हि कथम्भावयितव्यमिति कथन्ताकाङ्क्षा । न हि 'भावना' इति सिद्धरूपेणाभिधाने कथमित्याकाङ्क्षोदेति । तद्वदत्रापि द्रष्टव्यम् । तत्र 'अग्निहोत्रञ्जुहोति' 'सोमेन यजेते'त्यादितत्तत्कर्मविशेषविधायकवाक्येषु विशिष्टार्थभावना विधिविषय इति अर्थभावनाया एव कर्तव्यत्वं साध्यत्वमवगम्यते । नतु शाब्द्याः । विध्यन्तराभावात् । 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधौ तु शाब्दभावनाया विधिविषयत्वेन कर्तव्यत्वमवगम्यते। तथाहि । यद्यपि श्रूयमाणो विधिः स्वाध्यायपदवाच्याक्षरराशिप्राप्तिफलकमध्ययनम्पुरुषोद्देशेन विधत्ते तथाऽपि अध्ययनप्राप्तस्य स्वाध्यायस्योपयोगे जिज्ञासिते स्वाध्यायघटकविधिवाक्यैः प्रवर्तनाज्ञानपुरस्सरं यत् स्वर्गादीष्टसाधनीभूतयागादिपरिज्ञानन्तदर्थतामयमेव विधिः स्वाध्यायस्यावबोधयति । तत्र विधिप्रत्ययेभ्यः प्रवर्तनां बुध्वा यागे इष्टसाधनत्वं पुरुषो यदनुमिनोति तत्र, विधिः प्रवर्तनां केवलं ज्ञापयति वस्तुतः कर्म इष्टसाधनन्नवा अत्र मया प्रवर्तितव्यन्नवेति पुरुषो मा शङ्किष्टेति, तस्य लिङ् मां साग्रहं

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रवर्तयतीति लिङ्गतप्रवर्तकत्वे आवश्यकत्वज्ञानं यथा स्यात् तथा विधिरयं व्याप्रियत इति प्रदर्शयितव्यम् । तदर्थमिदमुच्यते—अध्ययनसंस्कृतः स्वाध्यायः कोपयुज्यतामित्याकाङ्क्षोदये यद्यदृष्टप्रयोजनं सम्भवति तत्तत्स्वाध्यायेन कर्तव्य'मिति सम्भविनि दृष्टप्रयोजने स्वाध्यायं विनियुज्य श्रूयमाणो विधिर्विश्राम्यति । तत्रेतरेषामर्थवत्वस्य विधिमुखनिरीक्षित्वात् तद्विनियोगप्रकारः प्रतिपाद्यते । पुरुषप्रवृत्तिप्रयोजकव्यापाररूपप्रवर्तनाश्रयाणां विधिशब्दाभिधेयानां लिङान्दृष्टप्रयोजनं पुरुषप्रवृत्तिरेवेति तत्रैव ते स्वाध्यायविधिना विनियुज्यन्ते । किं कर्तृत्वेनोत करणत्वेनेति विशेषजिज्ञासायां तदुच्चारयितृपुरुषाभावेन स्वातन्त्र्यात् कर्तृत्वेनेति विज्ञायते । तथाच विनियोगवचनव्यक्तिरियम्—अध्ययनोपात्ता लिङः पुरुषप्रवृत्तिं भावयेयुरिति । केन कथमिति करणोतिकर्तव्यतयोराकाङ्क्षायां सामर्थ्यात् विधिज्ञानं प्राशस्त्यज्ञानञ्च क्रमेण करणत्वेनेतिकर्तव्यतात्वेन च भावनासम्बन्धमनुभवतः । न च चेतनप्रवर्तनात्मा विधिः कथमचेतनान् लिङो नियुञ्जीतेति वाच्यम् । पुरुषस्तावत् प्रयोज्यो न तु प्रयोजकः प्रयोजकेन तु केनचिद्भवितव्यम् यः प्रकृतविधिनियोज्यतां भजेत । तत्रान्यस्यासम्भवेन लिङामेव प्रयोजकत्वं प्रकृतविधिनियोज्यत्वञ्च कल्प्यते । चैतन्यमपि पुरुषद्वारकन्तत्र भविष्यति आरोपयिष्यत इति । लिङ्भिः पुरुषप्रवृत्तौ जननीयायां विधिज्ञानपूर्वकं स्वर्गादिसाधनीभूतयागाद्यवबोधो द्वारमिति न स्वाध्यायविधेः पूर्वोक्तार्थज्ञानोद्देश्यकत्वविरोधः । एवञ्चास्मात् श्रुतानुमितैकदेशनिष्पन्नात् 'अध्ययनोपात्ता लिङः प्राशस्त्यज्ञानसहकृतेन विधिज्ञानेन पुरुषप्रवृत्तिं भावयेयु'रिति वाक्यात् पुरुषप्रवृत्ति-

Digitization by Arya Samaj Charitable Foundation, Chennai

सैषा शब्दभावनाप्यंशत्रयविशिष्टा । तत्र पुरुषप्रवृत्तिरूपार्थभावना भाव्यत्वेनान्वेति । अध्ययनावगतलिङादिकं करणत्वेनान्वेति । अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्त्तव्यतात्वेनान्वेति । तथा च साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद्व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैर्यागाद्यर्थान् कर्त्तव्यत्वेनबुध्वा यागादीननुतिष्ठेयुरिति शब्दभावनाबोधः । अनुतिष्ठेयुः अनुष्ठानं कुर्युरित्यर्थः । अनुष्ठानं प्रवृत्तिः । तेन पुरुषप्रवृत्तेः शब्दभावना-

---

भाव्यिका विधिज्ञानकरणिका प्राशस्त्यज्ञानेतिकर्तव्यताका लिङ्कर्तृकाऽर्थभावना शब्दभावनाविषयइति बोधस्य जायमानतया प्रातिस्विकविधिवाक्यप्रतीतशब्दभावनानामेवात्र लिङ्कर्तृकार्थभावनात्वेन भातानां विधिविषयत्वेन कर्तव्यताऽवगम्यत इति । तत्र इतिकर्तव्यतापेक्षायां प्राशस्त्यरूपतत्समर्पणायार्थवादा व्याप्रियन्त इति स्थितमर्थवादानां प्रामाण्यमिति ॥ तदेतत्सर्वं मनसि निधाय प्रसङ्गात् शाब्दभावनाबोधं प्रतिपिपादयिषुराह । सैषेति ॥ सामर्थ्याद्विधिज्ञानं करणमित्युक्तं प्राक् । तत्र विधिः प्रवर्तनाऽपि लिङपि । प्रकृते लिङिति कृत्वा तद्ज्ञानस्य करणत्वे ज्ञानद्वारा तस्यापि करणत्वं स्थितमित्यभिप्रेत्य लिङादिकमेव करणत्वेनान्वेतीत्याह । अध्ययनेति ॥ आद्यर्थो लोट्प्रभृतिः ॥ प्रत्येकमंशत्रयमभिधाय विशिष्टान्वयबोधं प्रतिपादयन्नाह । तथाचेति ॥ पुरुषाअनुतिष्ठेयुरिति पुरुषप्रवृत्तिरूपं भाव्यमुक्तम् । लिङादिभिरिति करणम् ॥ लिङ्ज्ञानेन प्रवर्तनाज्ञानम् ततस्तद्विषयत्वेन यागादाविष्टसाधनताज्ञानं ततः कर्तव्यत्वबुद्धिरित्येतावत् प्रवृत्तिजनने द्वारम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेतदुक्तं **यागाद्यर्थं कर्तव्यत्वेन बुध्वेति** ॥ अत एव **लिङादिभि-रिति** तृतीया **बुध्वेत्यनेनान्वीयते** ॥ विहितस्याध्ययनस्यानुष्ठानपर्य-न्तत्वमाह । **अध्ययनगृहीतस्वाध्यायगतेति** ॥ एवं लिङ्ज्ञानपूर्व-कमनुष्ठाने पुरुषाणां सामर्थ्यलभ्यमधिकारिविशेषणमाह । **साङ्गवेदा-ध्येतार**इति ॥ वेदाध्ययनं केवलमस्तु अलमङ्गाध्ययनेन अतस्तदाव-श्यकतान्दर्शयति । **अधीतेति** ॥ **प्राशस्त्यज्ञानसाचिवैरि**त्यनेनेति-कर्तव्यताऽभिहिता । साचिव्यमनुष्ठापने न तु कर्तव्यताबोधन इत्यव-धेयम् । इदमत्रभाति—नायमाकारश्शाब्दभावनाबोधस्य । शाब्दभा-वनाबोधोहि, उक्तमंशत्रयं यत्र शाब्दभावनायां साक्षात्सम्बन्धमनुभूय विशेष्यभूतया तया साकं भासते स एव । न चैष संबन्ध उक्तवाक्या-त्प्रतीयते । तथाहि—अनुतिष्ठेयुरिति तावत्प्रकृत्या प्रवृत्तिरर्थभावना, प्रत्ययेन च शब्दभावना, उभयमपिवा धातोरनुवादत्वाङ्गीकारे भाव-येदित्यादाविव प्रत्ययेनैव प्रतिपाद्यते । तत्रार्थभावना मुख्यविशेष्य-भूतेति स्थितमन्यत्र । एवञ्च यजेतेत्यादाविव 'पुरुषाश्रयाऽर्थभावना शब्दभावनाप्रयोज्या' इत्येव बोधस्य जननेनार्थभावनाया भाव्यत्वेन शब्दभावनान्वयासम्भवः । तथा लिङादिभिर्बुध्वेत्यादीनामप्यर्थभा-वनायां पुरुषप्रवृत्तिरूपायामेवान्वयस्य व्युत्पन्नत्वात् शब्दभावनान्वयो दुरुपपादः । यदितु शब्दभावनाविशेष्यत्वमभ्युपगम्य तत्र स्वका-रकविशिष्टपुरुषप्रवृत्तिरर्थभावना भाव्यत्वेनान्वेति लिङादिकमपि करणत्वेनेत्यभिधीयते तर्हि प्रतिविधिवाक्यमेवं वर्णयितुं सुशकत्वात् अध्ययनविधिस्थले केवलं शाब्दभावनाबोधवर्णनमसंगतं स्यात् । अपिच कर्तव्यत्वेन प्रतीतौ सत्यामेवेतिकर्तव्यताकाङ्क्षा उदियादि-

Digitization by Sarayu Trust. Funding by Madras Foundation, Chennai

भाव्यत्वमक्षतम् । इयञ्च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकवाक्येषु स्वरूपेण प्रतीयमानाऽपि कर्त्तव्यत्वेन न प्रतीयते । अर्थभावनाया एव तेषु कर्त्तव्यत्वावगमात् । किन्तु 'स्वाध्यायोऽध्येतव्य' इतिवाक्य एव कर्त्तव्यत्वेन प्रतीयते । नचात्रा-

---

त्युक्तम् । न च पुरुषा अनुतिष्ठेयुरित्युक्ते लिङभिहितायाश्शब्दभावनायाः कर्तव्यत्वं प्रतीमः । विधिविषयत्वे हि तत्प्रत्ययस्स्यात् । नचाख्यातं विधिद्वयमाह ॥ तात्विकः शाब्दभावनाबोधाकारस्तु अध्ययनोपात्ता लिङः विधिज्ञानेन प्राशस्त्यज्ञानसहकृतेन पुरुषप्रवृत्तिं भावयेयुरिति वाक्येनैवाभिलापमर्हतीति वेदितव्यम् । ग्रन्थकृता तु अंशत्रयस्य शब्दभावनासम्बन्धिन एकत्र समुच्चित्य परस्पराभिसम्बन्धप्रदर्शनार्थमापाततो यत्किंचिदुक्तमिति सन्तोष्टव्यम् ॥ उक्तांशत्रयावगाहिनी शब्दभावनाप्रतीतिर्नैवानुभाविकीति तत्र श्रमो मुधेति नवीनानां पन्था इत्यन्यत्र विस्तर इति ॥ नन्वध्ययनविध्यधीनश्शाब्दभावनाबोध एव कथितः । न तु 'सोमेन यजेते' त्यादिविध्यधीनः। तत्कथमिति शङ्कामपाचिकीर्षुः यत्र कर्तव्यत्वेन प्रतीतिस्तत्रैवांशत्रयाकाङ्क्षयोक्तविधबोधस्सम्भवति न तु यत्र स्वरूपतो ज्ञानन्तत्रापीत्याशयेन सोमेनेत्यादिवाक्येषु शब्दभावनायाः कर्तव्यत्वेन प्रतीतिर्नास्तीत्याह । इयञ्चेति ॥ इतिवाक्यएवेति ॥ इतिवाक्याधीनविनियोगवाक्य एवेत्यर्थः ॥ तच्च विनियोगवाक्यं 'अध्ययनोपात्ता लिङ' इत्यादिनाऽस्माभिरुक्तं वेदितव्यम् ॥ एतेन स्वाध्यायोऽध्येतव्य इति स्वाध्यायभाव्यकाऽध्ययनकरणिका अर्थाक्षिप्ताध्येतृकर्तृकाऽर्थभावना विधिविषयइत्येवं स्वाध्यायसंस्कारकगुणकर्मविधायकमिदं वाक्यमिति

Digitization by Arya Samaj Charitable Foundation, Chennai

प्यर्थभावनाया एव विधेयत्वमिति वाच्यम् । 'स्वाध्यायोऽध्येतव्यः' इति वाक्यस्थार्थभावनाया एव सकलविधिवाक्यस्थशब्दभावनारूपत्वात् । तथाहि—अधिपूर्वकात् 'इङ् अध्ययने' इति धातोः कर्मणि तव्यप्रत्ययो विहितः। कर्मच स्वाध्यायः प्रधानम्। तत्संस्कारकमध्ययनं गुणकर्म व्रीहिसंस्कारकप्रोक्षणादिवत् । अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगतलिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यदनुष्ठानौपयिकं यागादिरूपार्थज्ञानं तदेव दृष्टत्वात् तत्तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयस्साधनत्वाच्च प्रयोजनम् । कर्मावबोधं विना कर्मानुष्ठानायोगात् । न त्वदृष्टं प्रयोजनम् । दृष्टफले

वक्ष्यमाणमसंगतमिति निरस्तम् ॥ अत्रेति ॥ उक्तविनियोगवाक्य इत्यर्थः ॥ इति वाक्यस्थेति ॥ इतिवाक्याधीनविनियोगवाक्यघटकाख्यातप्रतिपादितेत्यर्थः ॥ रूपत्वादिति ॥ तदिदं पूर्वमेव प्रतिपादितम् ॥ ननु 'स्वाध्यायोऽध्येतव्य' इत्यत्र यदि स्वाध्यायोद्देशेनाध्ययनं विधीयते तर्हि, अनुपयुक्तस्य संस्कार्यत्वायोगात्तदन्यथानुपपत्त्या युक्तं यत्तद्विनियोजकं वाक्यान्तरं कल्प्यते यत्र शब्दभावनानां कर्तव्यत्वमवगम्यत इति । तदेव तु न सिद्धम् । स्वाध्यायाध्ययनस्यादृष्टार्थं विधानात् । नैतदेवमित्याह । तथाहीत्यादिना ॥ कर्मेति ॥ तव्योपात्तकर्मकारकशक्त्यवच्छिन्नइत्यर्थः ॥ विशिष्टेति ॥ घटितेत्यर्थः। सामर्थ्येति ॥ लिङ्घटितानि हि वाक्यानि कर्मानुष्ठाने पुरुषं प्रवर्तयन्ति । कथमिदं पुरुषस्य ज्ञानमनुत्पाद्य शक्यं कर्तुमिति सामर्थ्यम् ॥ उक्तमेव सामर्थ्यमुपपादयति कर्मावबोधमिति ॥ यदर्थमयन्तथाही-

Digitization by Arya Samaj Charitable Foundation, Chennai

सम्भवत्यदृष्टकल्पनायोगात् । तथाच स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्वाः शब्दभावना अंशत्रयविशिष्टाः कर्त्तव्यत्वेन विधीयन्ते– साङ्गवेदाध्ययनव्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसाचिवैः फलवद्यागादिकर्त्तव्यतां बुद्ध्वा यागादीननुतिष्ठेयुरिति । अनुतिष्ठेयुः प्रवृत्तिं कुर्युरित्यर्थः । तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात् , अध्ययनावगत-

---

त्यारम्भस्तदाह । तथाचेति ॥ गुणकर्मविधायकत्वे सिद्धेचेत्यर्थः ॥ स्वविहितसंस्कारसंस्कार्यत्वान्यथानुपपत्त्येत्येवस्यार्थः ॥ कर्तव्यत्वेन विधीयन्त इति ॥ कर्तव्यताबोधकस्वाक्षिप्तविनियोगविधिविधेया यथा स्युस्तथा क्रियन्त इत्यर्थः ॥ यद्यपि कर्तव्यत्वेन विधानप्रकारः प्रागुक्तरीत्या प्रथमान्तलिङ्घटितवाक्येनैवाभिलापमर्हति तथाऽपि तत्र लिङां पुरुषगतचैतन्यद्वारकन्नियोज्यत्वन्न सुखं व्युत्पित्सूनां बुद्धिमारोक्ष्यतीति यथाकथञ्चित् शब्दभावनासम्बन्ध्यंशत्रयमुपादायाभिलपति । साङ्गेति। वस्तुतस्त्वत्र शब्दभावनाया विधिविषयत्वाभावान्न कर्तव्यत्वेन प्रतीतिरित्याद्युक्तप्रायम् ॥ शाब्दभावनाबोधाकारं प्रदर्शयितुं पूर्वमिदमुक्तम् । अत्र पुनः कर्तव्यत्वेन विधानप्रदर्शनार्थमिति न पुनरुक्तिः ॥ शब्दभावनासम्बन्धि अंशत्रयं पुनर्विशिष्य प्रदर्शयन् 'सैषा शब्दभावनाप्यंशत्रयविशिष्टे' त्युपक्रान्तं तत्प्रस्तावमुपसंहरति । तत्रेति । ननु फलवद्यागादिकर्तव्यतां बुध्वेत्युक्तम् । तत्र फलवत्वं कथंलब्धम् । फलवत्वं हि फलसाधनत्वम् । न च तत्साधनत्वबोधकः कश्चिच्छब्दः परिदृश्यते । न च विधिवाक्येषु स्वर्गकाम इत्यादिफलश्रवणात्तदव-

Digitization by Arya Samaj Charitable Foundation, Chennai

लिङादेः करणत्वेनान्वयात्, प्राशस्त्यज्ञानस्येतिकर्तव्यतात्वेनान्वयात् शब्दभावनाया अप्यंशत्रयवैशिष्ट्यमर्थभावनाया इव इष्टम् । तत्र समीहितस्वर्गादिभाव्यकत्वमपि विधिवशादेव । प्रवर्तनापरो हि विधिर्यागादेः पुरुषार्थसाधनत्वे तत्र पुरुषं प्रवर्त्तयितुं शक्नोतीति स्वभाव्यपुरुषप्रवृत्तिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति। अन्यथा स्वस्य

गमः । तत्र स्वर्गकामनायाः 'स्त्रीकामः प्रायश्चित्तं कुर्या' दित्यादाविव निमित्तत्वेन वाऽधिकारिविशेषणत्वेनवोपपत्तेरितिचेदाह । तत्रेति॥ अर्थभावनायामित्यर्थः ॥ भाव्यत्वानुभवयोग्यतान्दर्शयितुं समीहितेति विशेषणम् ॥ ननु यागे इष्टसाधनत्वं कथमिति पृष्टम् । अर्थभावनायाः स्वर्गभाव्यकत्वं विधिवशादित्यन्यदुक्तम् । न । तत्र स्वर्गभाव्यकत्वे सिद्धे यागे स्वर्गसाधनत्वस्य स्वयं सिद्धेरित्याह । प्रवर्तनेति ॥ अयं भावः– विधिर्हि प्रवर्तना यागादौ या पुरुषस्य प्रवृत्तिः तदनुकूलो व्यापारः । तत्र पुरुषस्य प्रवृत्तिर्नेच्छां विना । साऽपि नेष्टसाधनत्वज्ञानमन्तरा । तत्र यद्यपि न साक्षात्तद्बोधकं पदं किमपि श्रूयते तथाऽपि प्रवर्तना स्वयमेव स्वप्रवर्तनात्वभंगभिया स्वविषयस्य तदाक्षिपतीत्यंगीकार्यम् । तादिष्टं किमिति विशिष्य जिज्ञासायां सन्निहितमीप्सितं स्वर्गादिकमेवेति ज्ञायते । एवमसम्भवात्तु 'स्त्रीकाम' इत्यादावन्यथाऽङ्गीकारइति ॥ अथ तत्र जायमानमिष्टसाधनत्वज्ञानं भ्रान्तं स्यात् । न स्यात् । ज्ञानं हि नः स्वतः प्रामाण्यशालि । नचात्र बाधकं किमप्यस्तीति ॥ साधनत्व इति ॥ बोधित एवेति शेषः ॥ अन्यथेति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रवर्त्तनात्वमेव न स्यात् । प्रवृत्तिहेतुव्यापारस्यैव प्रवर्त्तनात्वात् । लडादिस्थले तु प्रवर्त्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यकत्वनियमो नास्ति । भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम् । तत्रार्थभावनायां भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः । शब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः ।

ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र यागेन स्वर्गं

स्वर्गादिसाधनत्वानापादनइत्यर्थः ॥ **नस्यादिति** ॥ कथं न स्यात्तत्राह । **प्रवृत्तीति** ॥ इष्टसाधनत्वानवगमे कदाचिदपि कस्यापि प्रवृत्तिर्न जायेतेति प्रवृत्तिहेतुत्वमभज्येतेति भावः ॥ प्रवर्तनाया इष्टसाधनताक्षेपकत्वेऽन्वयमुपपाद्य व्यतिरेकन्दर्शयति । **लडादीति** ॥ इदानीं भावनासामान्यलक्षणमाह । **भावनात्वमिति** ॥ चिन्त्यमिदम्– यदि हि प्रकृतभावनाद्वयमेव लक्ष्यम् घटप्रयोजककुलालचेष्टायामतिप्रसंगः । अथ साऽपि लक्ष्यभूता, लक्ष्यतावच्छेदकमनुगतन्दुर्लभम्, प्रकृतानुपयोगश्च । परन्तूक्तं रूपं भावनापदप्रवृत्तिनिमित्तं प्रकृतलक्ष्यद्वये भावनापदप्रयोगौचित्यनिर्वाहकम् । तदुक्तमभियुक्तैः 'उत्पादकव्यापारत्वाद्भावनाशब्देन गीयते । भाव्योत्पादानुकूलस्य व्यापारस्य भावनात्वप्रसिद्धे' रिति ॥

एवं विधितदर्थौ निरूप्य विध्येकदेशन्नामधेयन्निरूपयितुं शङ्कते । **नन्विति** ॥ यद्वा विधिनिरूपणानन्तरं तदेकदेशनामधेयनिरूपणोपयोगिनमुपोद्घातं समाप्य नामधेयन्निरूपयितुं शङ्कते । **नन्विति** ॥ अत्राख्यातोपात्तभावनान्वयिनः फलस्य करणस्येतिकर्त-

Digitization by Arya Samaj Charitable Foundation, Chennai

भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वय इति चेन्न। भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात्–ज्योतिष्टोमनामकेन यागेनेति । कथं तन्नामत्वमिति चेन्न। ज्योतिराख्यास्त्रिवृदादिस्तोमा अस्मिन् सन्तीति व्युत्पत्त्या यागनामत्वात् । यागस्य त्रिवृदादिस्तोमसम्बन्धः केनावगम्यत इतिचेन्न । 'त्रिवृत्पञ्चदशः सप्तदश एकविंशः एतानि वाव ज्योतींषि य एतस्य स्तोमा'इति वाक्यान्तरेण एतच्छब्दार्थस्य तत्सम्बन्धावगमात् । एवं शा-

---

व्यतायावा समर्पकत्वासम्भवादयमंशोऽप्रमाणमेवेत्याक्षेप्तुराशयः ॥ यदि भावनान्तर्भावः कथमपि न सम्भवति तर्हि युक्तमिदमप्रमाणमिति । नत्वेवं प्रकृते । भावनान्तर्गतकरणसमर्पकत्वस्यैव सुवचत्वात् । न च धातुनैव करणसमर्पणम् । तेन सामान्यरूपेण समर्पणेऽप्यनेन विशेषरूपेण समर्पणे बाधकाभावादित्यभिसन्धाय समाधत्ते । नेति ॥ अथ क्रमेण नामधेयत्वनिर्णायकानि चत्वारि प्रमाणानि निरूपयिष्यन् शङ्कते । कथमिति ॥ ज्योतिष्टोमेनेत्यस्य भावनानन्तर्गत्याऽप्रामाण्ये प्रतिपादिते नामधेयत्वेनान्वय इति प्रौढानामप्रामाणिकी या काचिद्वाचोयुक्तिरिति शङ्कितुरभिसन्धिः ॥ आकरे क्रमस्यान्यादृशत्वेऽपि प्रकृते आक्षेपस्थलानुरोधेन तत्प्रख्यशास्त्रात्मकं नामधेयप्रमाणमेवादौ निरूपयति । ज्योतिरिति ॥ एवं योगेनैव ज्योतिष्टोमपदस्य यागे प्रवृत्त्युपपादनेनाप्रामाणिकत्वशङ्का व्युदस्ता ॥ नन्वेवं गुणसमर्पकमस्तु पदमिदमिति शङ्कते । यागस्येति ॥ केनेति ॥ तथाचात्रैव तद्विधानमावश्यकमिति भावः ॥ स्तोमपदं व्याख्यास्यते । एतच्छब्देति ॥ यागस्येति शेषः । अवगमादिति ॥ तथा च 'विधि-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्त्रोक्तैस्तत्प्रख्यादिभिर्हेतुभिस्तत्र तत्र नामत्वं बोध्यम् । शास्त्रे हि तत्प्रख्यतद्व्यपदेशयौगिकवाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम् । तथाहि–'अग्निहोत्रं जुहोति'इत्यत्र अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते । 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोती'ति वाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात् । किन्तु अग्निप्रख्यापकमग्निप्रापकं यच्छास्त्रान्तरम् 'अग्निर्ज्योति-

---

त्सितगुणप्रापिशास्त्रमन्यद्यतस्त्विह । तस्मात्तत्प्रापणं व्यर्थमिति नामत्वमिष्यता'मिति भावः ॥ एवन्तत्प्रख्यन्यायमुदाहृत्य अध्येतॄणान्तत्प्रामाण्यप्रत्ययाय शास्त्रीयत्वमनुसन्दधानस्तानि प्रमाणानि नामभिर्निर्दिशति । **एवमिति** ॥ **यौगिकइति** ॥ योगव्युत्पत्तिशाली शब्द इत्यर्थः । गुणे कर्मणि च तुल्यवद्वर्तमानश्शब्द इति यावत् ॥ अत्र यौगिकशब्दस्थाने मत्वर्थलक्षणाम् केचिदिच्छन्ति । तथात्वे 'सोमेन यजेते'त्यत्र सोमपदस्य मत्वर्थलक्षणाभिया नामधेयत्वापत्तिरिति ग्रन्थकृताऽन्यथोक्तमिति वेदितव्यम् ॥ परेतु विधिवाक्यानन्तरं तदर्थे वर्णिते तत्र ज्योतिष्टोमेनेत्यादिपदानन्वयरूपमाक्षेपं 'ननु ज्योतिष्टोमेने'त्यादिनोद्भाव्य 'भावनाकरणत्वेने'त्यादिना नामधेयत्वेनान्वय इति समाहितम् । तत्प्रसङ्गान्नामधेयत्वप्रमापकाणि प्रमाणानि निरूपयितुमुपक्रमते **एवं शास्त्रोक्तैरित्यादिनेत्यवतारयन्ति** ॥ एवं चेन्नामधेयनिरूपणं प्रासङ्गिकमिति विभावनीयम् ॥ भावनायां करणत्वेनाभिमतयागनामत्वमुपोद्बलयितुं तृतीयान्तनामधेयपदघटितं वाक्यमुदाहृत्य व्युत्पत्तिवैशद्याय मूलोक्तमपि तत्प्रख्यन्यायोदाहरणं द्वितीयान्तनामधेयपदघटितमाह । **अग्निहोत्रमिति** ॥ **अनुवादकत्वेनेति**।

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्योतिरग्नि'रित्यादिकम् तेन प्राप्तमग्निसम्बन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणा अग्निहोत्रपदस्य होम नामधेयत्वम् । न च होमस्य प्रत्ययवाच्यायामर्थभावनायां करणत्वात् तन्नामत्वे अग्निहोत्रेणेति तृतीया स्यात् ज्योतिष्टोमेनेतिवदिति वाच्यम् । द्वितीयाया एव लक्षणया करणार्थकत्वात् नासाधितं करणमितिन्यायेन असाधितस्य करणत्वायोगात् अर्थात् प्राप्तहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायेनात्र नामत्वम् ।

तथा 'श्येनेनाभिचरन् यजेते'त्यत्र तद्व्यपदेशन्यायात् श्येनपदं यागनामधेयम् न तु यागाङ्गत्वेन श्येनपक्षिरूपगुणविधिः। 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तम्भ्रातृव्यं निपत्यादत्त' इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात् । श्येनपक्षी

वेति चार्थे । अनुवादकत्वस्याङ्गीकारेऽनङ्गीकारे वा करणत्वे लक्षणाया आवश्यकत्वेन करणत्वानुवादकत्वयोर्विकल्पायोगादिति ध्येयम् ॥

तद्व्यपदेशान्नामत्वं यत्र तत्स्थलमुदाहरति । **एवमिति** । **तद्व्यपदेशेति** । तदा विधित्सितो गुणः परामृश्यते । वीति विशेषे स च विभिन्नार्थकत्वरूपः अपदेशस्सङ्कीर्तनम् तथाच 'यथा ह वा' इति वाक्यशेषे एकस्यैवोपमानोपमेयभावानुपपत्त्या 'यथा' 'एवं' पदाभ्यां विधिघटकश्येनपदस्य प्रसिद्धश्येनापेक्षया विभिन्नार्थकत्वप्रतीतेः विधित्सितश्येनरूपगुणापेक्षया विभिन्नार्थकतया सङ्कीर्तनरूपोऽयं वाक्यशेष इति स एव तद्व्यपदेशः ॥ परेतु विशेष उपमानत्वम् । विधित्सितगुणस्योपमानत्वेन यत्र कीर्तनम् स वाक्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा पक्ष्यन्तरं निपत्यादत्ते एवमयमपि श्येननामकः कर्मविशेषो भ्रातृव्यं शत्रुं निपत्यादत्ते इति व्यपदेशः कर्मनामत्वपक्ष एव युज्यते । यागाङ्गतया श्येनपक्षिविधौ तु स्वस्य स्वेनैव उपमानोपमेयभावः स्यात् स चायुक्तः । तस्मात् श्येनपदं नामधेयम् । ततश्चाभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारम्भावयेदिति वाक्यार्थः । नन्वेवमभिचारस्यापि वेदोक्तत्वात् आभिचारिके कर्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति चेन्न । वेदोक्तोऽप्यभिचारो वेदविहितो न भवति फलत्वात् । फलं न विधेयं । किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव वि-

---

शेषस्तद्व्यपदेश इत्याहुः ॥ आक्षिप्य किंचित्समाधास्यन् प्रकृतविषयवाक्यार्थमाह । ततश्चेति ॥ श्येनपदस्य नामधेयत्वे सतीत्यर्थः ॥ वधकामइति ॥ 'अभिचर' न्निति हि 'लक्षणहेत्वोः क्रियाया'इति व्याकरणस्मृत्याऽभिचारगतहेतुत्वद्योतकशतृप्रत्ययान्तमिति ज्ञायते । 'हेतुः फलं कारणञ्च' । विधिसमभिव्याहारात्तु प्रकृते फलत्वन्निर्धार्यते । तत इदं लभ्यते 'अभिचरन् शत्रुवधकाम' इति ॥ वधो मरणानुकूलो व्यापारः ॥ वेदोक्तत्वादिति ॥ वेदप्रमितस्य हिंसानिषेधस्य दैक्षादिपश्वालम्भनाविषयकत्वे वेदोक्तत्वमेव नियामकमित्यभिमानेनेदम् । तादृशमभिमानन्निराकर्तुं न तत्र वेदोक्तत्वन्नियामकम् अपि तु वेदविहितत्वमिति स्फोरयन्नाह । वेदेति ॥ ननु विहितत्वन्नाम विधिविषयत्वम् । तद्यथा यागस्य तथाऽभिचारस्यापीति को विशेषः । अस्ति विशेष इत्याह । फलमिति ॥ उद्दिश्येति ॥ तथाचोद्देश्यताख्यविधिविषयताऽभिचारात्मके फले । अज्ञातज्ञाप्यत्वात्मिका तु विलक्ष-

Digitization by Arya Samaj Charitable Foundation, Chennai

धेयमिति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवाय-जनकत्वम् ।

एवम् 'उद्भिदा यजेत पशुकाम' इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भित्पदं नामधेयम् । न तु यथाकथ-ञ्चित्प्राप्तं यागमुद्दिश्य तदङ्गतयोद्भिद्रूपगुणविधिः । दध्यादिव-

---

णविषयता विधेयतोच्यते । उपादेयतात्मिका वा । सेयमेव च यागा-दिगता विहितत्वव्यवहारनियामिकेति भावः ॥ अथास्तु विहितत्वं साधने मास्तु कामं फले । उक्तनिषेधशास्त्रसङ्कोचनियामकन्तु विहि-तत्वमेव नेतरदिति कथं प्रत्येतव्यम् । एवं प्रत्येतव्यम् । शास्त्रं हि हिंसा न कर्तव्येति सामान्यत आह । तदेवतु विशिष्य पश्वालम्भनं कर्तव्यमित्यपि । तत्रोभयप्रामाण्यात्सामान्यस्य विशेषस्थलातिरिक्तवि-षयकत्वं कल्प्यते । न ह्येवमभिचारस्यापि कर्तव्यत्वं शास्त्रं किञ्चि-त्प्रमापयति ॥ तदेतन्मनसि निधायोक्तम् इति सिद्धान्तादिति ॥

अथ यौगिकमाह । एवमुद्भिदेति ॥ यद्यपि ज्योतिष्टोम-प्रकरणपठितेऽस्मिन् वाक्ये पशुफलकयागान्तरोपस्थितिर्न सम्भवति । प्रकृतस्य च ज्योतिष्टोमस्य स्वर्गफलकत्वमेव श्रुतम् । तथाऽपि 'स-र्वेभ्यो ज्योतिष्टोम' इति संयोगान्तरेण ज्योतिष्टोमस्य सर्वफलार्थ-त्वबोधनात्पशुफलकज्योतिष्टोमोऽपि प्राप्त इति तदुद्देशेन गुणविधि-स्सम्भवत्येवेत्याशयेनोक्तम् यथाकथञ्चित्प्राप्तेति ॥ अथवा यथाकथञ्चिदिति गुणविधावित्यत्रान्वेति । तदात्वेच यद्यप्युत्प-त्तिशिष्टसोमावरुद्धे प्रकृतज्योतिष्टोमे गुणविधानन्न सम्भवतीति भाति तथाऽपि पशुफलकप्रयोगमात्रविषयत्वादेतद्गुणस्य तदन्यविषयकत्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

दुद्भिन्नामकस्य गुणस्याप्रसिद्धत्वात् । यागे तूद्भिद्यते फलमनेनेति योगवशेन वृत्तिसम्भवात् यागनामत्वम् । ननु उद्भिद्यते भूमिरनेनेति योगवशेन खनित्रादावप्युद्भित्पदप्रयोगसंभवात् खनित्रादिगुणविधिः किन्न स्यादिति चेन्न । एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्यते । विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात् । तथाहि — 'उद्भिदा यजेत पशुकाम' इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासम्भवात् पशुकर्मकभावनायां करणत्वेन यागो विधेयः— यागेन पशून् भावयेदिति। ततश्च यागस्य विधेयत्वम्, फलं प्रति शेषतया प्रतीयमानत्वाद्गुणत्वम्, शेषतया अङ्गतयेत्यर्थः, फलसिद्ध्यर्थं पुंसाऽनुष्ठीयमानत्वादुपादेयत्वमिति विधेयत्वगुणत्वोपादेयत्वात्मकमेकं त्रिकं यागेऽस्ति । तथा यागोद्देशेनोद्भिद्गुणविधौ विधित्सितगुणापेक्षया यागस्य प्राधान्यम्, उद्देश्यत्वम्, अनुवाद्यत्वञ्चेति द्वितीयं त्रिकम् । तदिदं त्रिकद्वयं परस्परविरुद्धमेकस्मिन् यागे

सोमस्येति निर्णीयत इति एतदुक्तेरभिप्रायो वर्णनीयः ॥ अप्रसिद्धत्वादिति ॥ अनेनास्य पदस्य रूढत्वशङ्कोत्सारिता ॥ यौगिकत्वमाह । यागेत्विति ॥ ननु विधेरधिकतरार्थवत्त्वाय योगेनैवार्थान्तरवाचकत्वमङ्गीकृत्य गुणविधानमेवात्र प्रतिपत्तव्यमिति शङ्कते । नन्विति ॥ ननूक्तप्रकारेण फलभावनायां धात्वर्थस्य यागस्य करणत्वेनान्वितत्वात् तत्र पुनर्गुणस्यान्वयोपपत्त्यै 'सोमेने'त्यादाविवोद्भिदेत्यत्र मत्वर्थलक्षणाऽङ्गीक्रियते न वा? न द्वितीय इत्याह । एतादृशस्थलइति । धात्वर्थस्यापि यत्र विधेयत्वं तत्रेत्यर्थः ॥ प्रथमचतुर्थे 'नामधेये गुण-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रसज्येत । अतो न गुणविधिः । न च 'सोमेन यजेते' त्यत्र विरुद्धत्रिकादिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणाभङ्गीकृत्य सोमवता यागेनेष्टं भावयेदिति सोमविशिष्टयागविधानात् यथा सोमरूपगुणविधिः, तद्वदुद्भित्पदस्यापि मत्वर्थलक्षणयाऽत्रोद्भिद्गुणविशिष्टयागविधिः स्यादेवेति वाच्यम् । सोमादौ गत्यन्तराभावान्मत्वर्थलक्षणया विशिष्टविध्यङ्गीकाराद्। उद्भिदादौ तु नामत्वेन गतिसम्भवाद्विशिष्टविध्यङ्गीकारायोगात् । तस्माद्योगवशादुद्भिदादीनां नामत्वम् ॥

तथा 'चित्रया यजेत पशुकाम' इत्यत्र चित्रापदं प्राजापत्यनामधेयम् । 'दधिमधुघृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्य' मित्यत्र 'तत्संसृष्टं प्राजापत्य' मिति सामानाधिकरण्यात् यो दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासम्बन्धः

श्रुते' रित्यधिकरणे सर्वमिदं स्थितम् ॥ अस्तु तर्हि मत्वर्थलक्षणेत्याद्यः पक्ष इत्याशंक्य समाधत्ते नचेत्यादिना अयोगादित्यन्तेन । गत्यन्तराभावादिति ॥ सोमशब्दस्य लताविशेषे रूढत्वेन यागे योगकल्पनास्यासम्भवादिति भावः ॥ न च रूढिर्वा त्यज्यतां मत्वर्थलक्षणावाऽऽश्रीयतामिति न किंचिद्विनिगमकमिति वाच्यम् । रूढित्यागे रूढ्यर्थस्यात्यन्ततिरस्कारापत्तेरिति ॥

अथ वाक्यभेदान्नामधेयत्वमाह । तथेति ॥ प्राजापत्येति ॥ प्रजापतिदेवताकयागविशेषेत्यर्थः ॥ तादृशयागविशेषोत्पत्तिमाह । दधीति ॥ अत्र कर्म एकमनेकंवेति नेह तन्यते॥प्राजापत्यमितीति॥

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रुतः तेनानुमितो यागो विधीयते । विहितस्य यागस्य फलाकाङ्क्षायां 'चित्रया यजेते' ति वाक्यं फलसम्बन्धविधायकम् । तत्र फलार्थत्वेन पुनर्विधिरिति । तस्य प्राजापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वात् चित्रापदं नामधेयम् । न तु 'अग्नीषोमीयं पशुमालभेते' ति वाक्यप्राप्तं पशुयागं यजेतेत्यनूद्य चित्रात्वस्त्रीत्वरूपगुणद्वयविधानम् । मानान्तरप्राप्तं कर्मोद्दिश्य तत्रानेकगुणविधाने वाक्यभेदप्रसङ्गात् । तदुक्तं 'प्राप्ते कर्मणि-

---

एषान्त्रयाणां पदानामिति शेषः ॥ सामानाधिकरण्यादिति ॥ अत्र पञ्चम्यर्थस्य प्रयोज्यस्योत्तरत्र 'श्रुत' इति पदार्थेऽन्वयः॥ दध्यादीति॥ प्रकान्तसर्वपरामर्शितच्छब्दलभ्यमिदम् ॥ श्रुतइति ॥ अवगतइत्यर्थः। 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या'मिति स्मृत्याविधिवाक्येऽस्मिन् तदादेर्नपुंसकत्वैकवचनान्तत्वे ॥ प्रकृतचित्रावाक्ये यजिना प्राजापत्योपस्थितिमुपपादयति । विहितस्येति ॥ ननु कथं वाक्यान्तरविहितस्य यागस्य चित्रावाक्ये पुनर्विधानं सम्भवति येन कारणत्वेन भावनान्वयशालिनस्तस्य चित्रापदन्नामधेयं स्यादितिचेदाह । फलार्थत्वेनेति॥ तथा च तत्रोत्पत्तिः अत्र तु विनियोगः करणत्वेनान्वयस्तूभयत्र समान इति भावः ॥ एवमङ्गीकारे निदानभूतं वाक्यभेदं प्रदर्शयन्नाह । नत्विति ॥ स्त्रीत्वस्य प्राणिगतलिंगत्वेन सामर्थ्यात् पशुयागस्यात्रोद्देश्यत्वाशङ्केति ध्येयम् ॥ तत्रेति सम्पातायातम्॥ वाक्यभेदेति॥ विधिस्तावदेकदा एकमेवार्थं विधत्त इति स्वभावोऽयन्तस्य । तत्रानेके गुणा यद्युपात्तास्तेषु यङ्कमपि विधाय विरतं श्रूयमाणे विधौ गुणान्तरविधानाय पुनरयं विधिरावर्तयितव्यो भवति । केवलप्रत्ययप्रयोगस्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

नानेको विधातुं शक्यते गुणः ' इति । मानान्तराप्राप्तकर्मत्वेतु एकदैवाष्टाकपालपुरोडाशामावास्यापौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासम्बन्धेनानुमितो यागो विधीयते इति सिद्धान्तात् । तदुक्तम् ' अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः' इति ॥

अथ यथा ' पशुना यजेत ' त्यत्र मानान्तरप्राप्तं यागमुद्दिश्य तदङ्गतया पशुनेत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसंख्यारूपाणां त्रयाणां वाक्यभेदं विनैव विधिरङ्गीकृतः, तद्वदत्राप्येकपदोपात्तचित्रात्वस्त्रीत्वविशेषितपशुद्रव्यकारकस्य वि-

---

साधुत्वात्प्रकृतिरपि । उद्देश्यविधेयसमर्पकं पदमपीति समग्रं वाक्यान्तरन्निष्पद्यत इति वाक्यभेदप्रक्रिया द्रष्टव्या ॥ **कर्मणीति** ॥ इदमविवक्षितम् ॥ ' प्राप्ते कर्मणी ' त्येतत्सार्थकयति । **मानान्तरेति** ॥ धात्वर्थस्यापि विधेयत्वे सर्वविशेषणविशिष्टस्य तस्य विशिष्टरूपेणैक्यान्न श्रूयमाणविधेरनेकविषयत्वमिति ग्रन्थान्तरेष्वनुसन्धेयमित्याशयवानाह। **इति सिद्धान्तादिति** ॥

प्रकृतेऽपि विधेयानां विशिष्टवेषेणैक्यं दृष्टान्तप्रदर्शनपुरस्सरं सम्पादयन् पूर्वपक्षयति । **अथेति** ॥ अत्रेदं बोध्यम् । ' यदग्नीषोमीयं पशुमालभत ' इति वाक्येन पशुद्रव्यविशिष्टयागस्योत्पत्तिरिति भाष्यकारप्रभृतिभिस्सर्वैरभिधानात न मानान्तरेण यागप्राप्तिर्यत्र पशुना यजेतेति वाक्येन पशुर्विधीयत ॥ परन्तु ' अग्नीषोमौ यजति' ' पशुना यजेत' इति वाक्यद्वयसद्भावं कृत्वा शाखान्तरानुसारेणवा चिंत्यत इति॥ वैशिष्ट्यसम्भवं द्योतयितुमेकपदोपात्तानामिति ॥ भिन्नपदोपादाने हि

Digitization by Arya Samaj Charitable Foundation, Chennai

धानान्न वाक्यभेदः । अतएव तत्र विधेयस्य पशोरुपादेयत्वात् तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमित्येकेनैव पशुना यष्टव्यम् । 'ग्रहं सम्मार्ष्टी' त्यत्र उद्देश्यगतत्वादेकत्वमविवक्षितमिति सिद्धान्तप्रवादः । कथम् । 'ग्रहं सम्मार्ष्टी' त्यत्र ग्रहमिति द्वितीयया ग्रहस्योप्सिततमत्वेनोद्देश्यत्वात् प्रयोजनवत्वाच्च प्राधान्यं गम्यते । संमार्गस्तु ग्रहं प्रति गुणभूतः । 'प्रति-

---

प्रत्येकमेव भावनान्वयान्न वैशिष्ट्यसम्पादनं शक्यम् ॥ ननु न तत्र सङ्ख्याऽपि विधिविषयः । एकवचनस्य साधुत्वार्थत्वात् । लिङ्गन्तु अन्यतोऽपि प्राप्स्यतीति शुद्धस्य पशोरेव तत्र विधेयत्वेन तदुदाहरणासङ्गतिरित्याशङ्क्य सङ्ख्याविवक्षाबीजम्प्रदर्शयति । अत एवेति ॥ अस्यैव विवरणं तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमितीति ॥ इति हेतोरित्यर्थः ॥ विधेयस्य पशोरुपादेयत्वादिति विवक्षाबीजमुक्तम् ॥ विवक्षाफलत्वेकेनैवेत्यादि ॥ कुत्र तर्हितदविवक्षा ? तदेतत् स्थलविशेषमुदाहृत्य प्रतिपादयति ॥ ग्रहमित्यादिना ॥ सिद्धान्तप्रवादइति ॥ सिद्धान्तरूपः प्रवाद इत्यर्थः ॥ अथवा सिद्धान्ते तत्र वर्तमानः सिद्धान्तसम्बन्धी वा प्रवादः अर्थात् सिद्धान्तिनां भूयो वाद इत्यर्थः ॥ ननूद्देश्यगतत्वेऽविवक्षितत्वम् उपादेयगतत्वे नेति किमिदमाज्ञामात्रेण व्यवतिष्ठते । न चेत् विशेषो वक्तव्यः इति व्युत्पित्सुः परिपृच्छति । कथमिति ॥ प्रतिप्रधानं गुणावृत्तिरिति वक्ष्यमाणन्यायप्रवृत्तये ग्रहाणां संमार्गापेक्षया प्राधान्यं साधयति । ग्रहमिति ॥ ईप्सिततमत्वेन ईप्सिततमत्वावगमेन ॥ उद्देश्यत्वात्प्रयोजनवत्त्वाच्चेति ॥ सक्तुन्यायवैषम्यस्फोरणायेदम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कत्वं विवक्षितम् । अथवा तृतीयाविभक्त्यभिहितयोर्लिङ्गसङ्ख्ययोर्विभक्त्यभिहितया करणकारकशक्त्या आत्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण सम्बन्धमनादृत्य तद्वदेव साक्षात् क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन परस्परमन्वयः । यागाङ्गत्वेन विहितो यः पशुः स एकः पुमांश्चेति । यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाती'त्यत्र कारकाणां क्रियान्वयनियमात् करणविभक्तिभिरारुण्यपिङ्गाक्षीत्वादीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेन अन्वये सति आरुण्यादेर्गुणस्यामूर्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायनीगोपरिच्छेदकत्वेन पश्चात् परस्परं पार्ष्ठिकान्वयः । या एकहायनी गौः सा पिंगाक्षी

भिधानम्, पश्चाच्च तदन्वितप्रातिपदिकार्थोपस्थित्यनन्तरं करणत्वाभिधानमिति विरम्य व्यापारापत्तिः । अतोऽन्यथैव भावनान्वयं लिंगसंख्ययोरुपपादयति । अथवेति ॥ शक्त्यात्मसात्कृतयोरिति ॥ पशुवत्तृतीयार्थकरणत्वे आधेयतासम्बन्धेनान्वितयोरित्यर्थः ॥ अनयो-'र्विधानसती'त्युत्तरत्रान्वयः ॥ तद्वदेव पशुवदेव ॥ परस्परसमाचारानभिज्ञानामेव पशुलिंगसंख्यानां प्रथमं भावनान्वये पश्चात्परस्परमन्वय इति विषयोऽयमनानुभाविक इति मास्मं शङ्काभूदित्येवमर्थमुक्तमरुणैकहायनीन्यायेनेति ॥ तथाचैवमेवानुभवः पण्डितानान्नान्यादृश इति भावः ॥ पश्चात्तनान्वयबोधमभिलपति । यागेति ॥ नियमादिति ॥ कारकत्वस्य क्रियान्वयित्वात्मकत्वेन तदनन्वये स्वभावभङ्गप्रसङ्ग इति भावः ॥ एतावता निरूपितं कथमिति प्रश्नसमाधान-

Digitization by Arya Samaj Charitable Foundation, Chennai

अरुणेति, तद्वत् । तदेवमुद्देश्यगतं विशेषणमविवक्षितं, उपादेयगतं विवक्षितमिति स्थितम् । एवञ्च चित्रापदेन चित्रत्वस्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेति पदानूदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्वमिति चेन्न ॥

तथासति प्रकृतस्य प्राजापत्ययागस्य फलसम्बन्धाकाङ्क्षस्य हानमप्रकृतस्याग्नीषोमीययागस्य कल्पना च स्यात् । तद्द्वयमयुक्तम् । तस्माच्चित्रापदं कर्मनामधेयम् । एवं तत्प्रख्या-

---

मुपसंहरति । तदेवमिति ॥ पूर्वपक्षमुपसंहरति । एवञ्चेति ॥ दृष्टान्तसामञ्जस्योपपत्तौ चेत्यर्थः ॥

अयुक्तमिति ॥ अस्मदिच्छानुसारेण कल्पने वेदार्थः पुरुषसम्बन्धेनाप्रामाणिकः स्यादिति भावः ॥ इदमुपलक्षणम् । विशेष्यस्य पशोः 'यदग्नीषोमीयम्पशुमालभत' इत्युत्पत्तिवाक्यादेव प्राप्तेः मन्त्रवर्णात् पुंस्त्वप्रमितेः स्त्रीत्वविधानायोगाच्चात्र विशिष्टविधानं न सम्भवतीत्यपि बोध्यम् ॥ केचिदाहुः पञ्चममपि नामधेयप्रमाणमस्ति वाक्यशेषात्मकम् । यथा 'वैश्वदेवेन यजेते' त्यत्र वैश्वदेवशब्दः चातुर्मास्यस्थविश्वदेवतद्भिन्नदेवताकयागाष्टकस्य नामधेयं 'यद्विश्वे देवास्समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्व' मिति वाक्यशेषादिति । तदेतन्न युक्तम् । देवताधिकरणन्यायेन मीमांसकमते देवतानां विग्रहहविरादानयुगपत्कर्मसन्निधिप्रीतिफलप्रदानानामळीकत्वेनास्य वाक्यशेषस्य स्तुतिमात्रपरत्वात् विश्वदेवकर्तृकत्वरूपप्रवृत्तिनिमित्तस्य तत्र बाधितत्वात् । अतस्तत्र देवोक्तरीत्या उत्पत्तिशिष्टदेवतावरोधसहकृततत्प्रख्यन्याय एव नामधेयत्वे प्रमाणमिति वाच्यमित्याशयेनाह ।

Digitization by Arya Samaj Charitable Foundation, Chennai

दीनामन्यतमेन सर्वत्र कर्मनामत्वमूह्यम् । इत्थं विधिवाक्यस्य प्रामाण्यं विचारितम् ॥

अर्थवादानान्तु स्वार्थपरत्वे प्रयोजनाभावादध्ययन-विधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यम् । स

एवमिति ॥

द्विविधे ब्राह्मणे विध्यात्मकैकविधानिरूपणानन्तरं अर्थवादात्मानमपरां विधान्निरूपयति । **अर्थवादानान्त्विति** ॥ अस्य 'प्रामाण्य' मित्युत्तरत्रान्वयः ॥ तुकारद्योतितं विधिप्रामाण्यापेक्षया एतत्प्रामाण्ये वैलक्षण्यं स्फुटयति ॥ **विधिवाक्यैकवाक्यतयेति** ॥ ननु तदेकवाक्यत्वन्नाम तदर्थान्वितस्वार्थाभिधायकत्वम् । नचैतत् 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्याद्यर्थवादेषु सम्भवति । एतद्वाक्यार्थस्य 'वायव्यं श्वेतमालभेत भूतिकाम' इति वाक्यार्थानन्वितत्वादिति शङ्कान्निवर्तयितुमाह । **विधेयगतप्राशस्त्यप्रतिपादनद्वारेति** ॥ यद्यप्यमीषामर्थवादानां विधेयगतप्राशस्त्ये शक्तिर्न भवति तथाऽपि लक्षणया तत्प्रतिपादने न किञ्चिद्बाधकमिति भावः । ननु कथं शक्यार्थन्त्यक्त्वाऽर्थान्तरे लक्षणास्वीकारः? तत्राह । **स्वार्थे प्रयोजनाभावादिति** ॥ न खलु भोः शब्दसामान्यं प्रयोजनवदर्थपरम् । शतशो व्यभिचारदर्शनात् । सत्यम् । लोके एवम् । वेदशब्देत्वयन्नियमोऽस्त्येव । कथमिदमवगम्यते? तदाह । **अध्ययनविधिवशेन प्रयोजनवदर्थज्ञानार्थत्वस्यावगमादिति** ॥ स्वाध्यायस्य तज्जन्यार्थज्ञानस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्विधः— निन्दाप्रशंसापरकृतिपुराकल्पभेदात् । तत्र निन्दार्थवादो यथा 'असत्रं वा एतद् यदच्छन्दोम'मित्यादिः, 'अश्रुजं हि रजतं यो बर्हिषि ददाति पुरास्य सम्वत्सराद् गृहे रुदन्ती' त्यादिश्च । प्रशंसार्थवादो यथा 'शोभतेऽस्य मुखं य एवं वेद' त्यादिः 'वायुर्वै क्षेपिष्ठा देवते' त्येवमादिश्च । परेणेदं महता पुरुषेण कर्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिः । यथा 'अग्निर्वा अकामयते' त्यादिः । परप्रवक्तृका-

---

वा इतरानपेक्षं द्वितीयोपात्तकर्मत्वानुभवे योग्यताविरहात् अर्थे प्रयोजनवत्वपर्यन्तावगम आवश्यक इति प्रागेव प्रतिपादितम् ॥ विधिरसौ लिखितपाठादिना सह पक्षप्राप्ताध्ययननियमनान्नियमविधिः । नियमापूर्वस्य क्रत्वपूर्वेषूपयोगः । अध्ययनधर्माणाञ्च नियमापूर्व एवोपयोग इति प्राञ्चः । वस्तुतस्त्वयमाक्षेपात्प्राक् प्रवृत्तत्वेनापूर्वविधिरेव । एतद्विधिसिद्धज्ञानवत एवाधिकारिणो लाभात् क्रतुविधिभिरुपायान्तरानाक्षेपेण तद्व्यावृत्त्या नियमविधिरिति व्यपदिश्यते । नियमापूर्वन्तु नैव कल्प्यते । अध्ययनधर्माणाञ्च निर्विघ्नपरिसमाप्त्यर्थत्वेनोपपत्तिरिति तु नव्याः ॥ **अच्छन्दोममिति** ॥ 'छन्दोमशब्देन चतुर्विंशः चतुश्चत्वारिंशः अष्टाचत्वारिंश इत्येते त्रयः स्तोमा उच्यन्ते । अक्षरसंख्यासाम्येन गायत्रीत्रिष्टुब्जगतीछन्दोभिर्मीयमानत्वात्' ॥ **प्रशंसेति** ॥ न च सर्वोऽर्थवादः प्रशंसारूप इति कथं तत्वं विभाजकधर्म इति वाच्यम् । लक्षणया स्तुतिपरत्वस्य सर्वसाधारण्येऽपि यथाश्रुते निन्दाया इव प्रशंसाया यत्र साक्षात्प्रतीतिस्तथात्वस्य विभाजकत्वादिति ॥ **परप्रवक्तृकेति** ॥ परः प्रवक्ता यस्य तथाभूतस्यार्थस्य प्रति-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्थप्रतिपादकोऽर्थवादः पुराकल्पः । यथा— 'तमशपद्'

पादक इत्यर्थः ॥ तथा च प्रतिपाद्यमानस्यार्थस्यान्यप्रोक्तत्वेनाभिधाने पुराकल्पः । अन्यथा कथने तु परकृतिरिति पर्यवसितम् ॥ तमिति ॥ अत्र शपतेरग्निः कर्ता । तेन धिया धिया मत्स्यहननस्याग्निरूपपरप्रवक्तृकत्वाविघात इति ध्येयम् ॥ अत्र तु मूलं मृग्यम् । अभियुक्ततरेण हि वार्तिककृता 'एककर्तृकमुपाख्यानं परकृतिः । अनेककर्तृकन्तु पुराकल्प' इत्यभिहितम् ॥ इदमेव च भंग्यन्तरेणोक्तं न्यायपरिशुद्धौ 'एकानुबन्धी कथाविशेषः परकृतिः । अनेकानुबन्धी तु पुराकल्प' इति ॥ एतदनुरोधेन प्रकाशकृताऽपि 'इति ह स्माह वट्कुर्वार्ष्णिर्माषानेव मह्यं पचते'ति परकृतिरर्थवादः । तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यज' न्निति 'उलमुकैर्हस्म पूर्वे देवास्समाजग्मुस्तानसुरा रक्षांसि निर्जघ्नु'रिति च पुराकल्पोऽर्थवाद इत्युक्तम् ॥ न्यायभाष्ये तु 'अन्यकर्तृकस्य व्याहतस्य विधेर्वादः परकृतिः । 'हुत्वा वपामेवाग्रेऽभिघारयन्ति । अथ पृषदाज्यम् तदुह [1]चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्ति । अग्नेः प्राणाः पृषदाज्यं स्तोममित्येवमभिदधती'त्येवमादि ॥ ऐतिह्यसमाचरितो विधिः पुराकल्प इति । 'तस्माद्वा एतेन ब्राह्मणा हविः पवमानं सामस्तोममस्तौषुः योने यज्ञं प्रतनवामह' इत्येवमादीत्यभिहितम् ॥ 'बवरः प्रावाहणिरकामयते'ति परकृतिः । 'इदंवाऽग्रे किञ्चनासी'दिति पुराकल्प इति तु भाट्टसारकृतः ॥ अनेन पुरापर्यायघटितत्वे पुराकल्प इति तदाशय इति भाति । 'पुरा ब्राह्मणा अभैषु'रिति ऋग्वेदभाष्योपक्रमस्थमपि पुराक-

---

१. चरकशाखोक्तकर्मानुष्ठातार इति शतपथभाष्ये स्थितम् ।

Digitization By Arya Samaj Charitable Foundation, Chennai

धिया धिया त्वा वध्यासु ' रित्यादिः । तत्र निन्दार्थवादस्य विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यपरत्वम् । ' अश्रुज ' मित्यादिरजतनिन्दाद्वारा विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात् । इतरेषां त्रयाणां साक्षात् प्राशस्त्यपरत्वमेव । ' वायुर्वा ' इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्तदेवता । अतस्तद्दैवत्यं कर्म प्रशस्तमिति विधेयदेवतागतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम् । ' अग्निर्वा अकामयते' त्यस्य अग्निदैवत्यो यागः पूर्वकाले अग्निना कृतत्वात् प्रशस्तः, अत आधिक्यादिदानीमप्यन्यैर्यजमानैरवश्यं कर्तव्य इति विधेयकर्मगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम् । एवमन्यत्राप्यूह्यम् । क्वचित् कार्यान्तरमप्यस्ति

ल्पोदाहरणमेवमाशयं प्रतीयते । न्यायमालायान्तु ' यज्ञेन यज्ञमयजन्त देवा ' इति न्यायसुधोदाहृतं वाक्यमेव पुराकल्पोदाहरणतयोपात्तमिति सुबहुनामात्रविमर्शनीयम् ॥ एषाञ्चतुर्णामर्थवादभेदानां विधिवाक्यैकवाक्यतया प्रामाण्यनिदानभूतं विधेयगतप्राशस्त्यप्रतिपादनमुपपादयति । तत्रेति ॥ विधेयेति ॥ 'तस्माद्बर्हिषि रजतं नदेय'मिति वाक्ये विधेयभूतो यो रजतदाननिषेधस्तत्प्राशस्त्यपरत्व इत्यर्थः । विरोधाभावादिति ॥ अनेन निन्दया प्राशस्त्यप्रतीतिरिति विरुद्धार्थकथनमिदमिति शङ्कां परिहर्तुमेतद्ग्रन्थारम्भ इति सूच्यते । साक्षादिति ॥ विधेयेतरगतनिन्दामद्वारीकृत्येत्यर्थः ॥ वायुर्वेति ॥ ' शोभतेऽस्य मुखं य एवं वेद ' इत्यपि गर्गत्रिरात्रसंज्ञककर्मविशेषविधायकवाक्यानन्तरं श्रुतम् तादृशकर्मविशेषप्रशंसापरम् । तस्य ज्ञानमेवे-

Digitization by Arya Samaj Charitable Foundation, Chennai

दृशफलकं किमुत तस्यानुष्ठानमिति प्रशंसेति बोध्यम् ॥ **अन्यत्रेति** ॥ 'तमशप' दिति पुराकल्पोदाहरणस्थल इत्यर्थः । **ऊह्यमिति** ॥ दर्शपूर्णमासप्रकरणे 'परिधीन्परिदधाती' ति परिधिविधिसन्निधौ 'अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् । ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त । सोऽग्निरबिभेत् इत्थंवाव स्यं आर्तिमारिष्यतीति । स निलायत । सोऽपः प्राविशत् । तन्देवाः प्रैषमैच्छन् । तम्मत्स्यः प्राब्रवीत् । तमशपत् धिया धिया त्वा वध्यासुर्यो मा प्रावोच इति । तस्मान्मत्स्यं धिया धिया घ्नन्ति । शप्तो हि । तमन्वविन्दन् । तमब्रुवन् उप न आवर्तस्व हव्यन्नो वहेति । सोऽब्रवीद्वरं वृणै यदेवं गृहीतस्याहुतस्य बहिः परिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति । तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषान्तद्भागधेयन्तानेव तेन प्रीणाती' ति प्रकृतपुराकल्पोदाहरणवाक्यघटितोऽर्थवादः श्रूयते । अस्य तावत्कृत्स्नस्य अग्निभ्रातृप्रीणनोपयुक्तबहिर्देशावधित्वेन परिधिस्तावकत्वं स्फुटमवगम्यते । तत्र यद्यपि 'तमशपत् धिया धिया त्वा वध्यासु' रिति प्रकृतपुराकल्पोदाहरणस्य न साक्षात्परिधिप्राशस्त्यप्रतिपादकत्वम् । तथाऽपि तद्घटितसमुदायद्वारा तस्य तथात्वमव्याहतमिति द्रष्टव्यमित्यभिप्रेत्योक्तमूह्यमिति ॥ एवमर्थवादानां प्राशस्त्यप्रतिपादकत्वेन प्रामाण्यं निरूप्यदानीन्तेषां सन्देहनिर्णायकत्वेनापि प्रामाण्यमस्तीत्याह । **क्वचिदिति** ॥ स्वसमभिव्याहृतविधिवाक्ये संशयो यत्र तादृशस्थलविशेष इत्यर्थः ॥ **कार्यान्तरमिति** ॥ प्राशस्त्यप्रतिपादनरूपकार्य-

---

१. यो देवेभ्यो हव्यं वहति सः ।

२. यदा यदा धीर्भवति हन्तुं तदा तदेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यथा 'अक्ताः शर्करा उपदधाती' ति विधौ 'अक्ता' इति पदेन द्रवद्रव्यसामान्यं प्रतीयते, तच्च द्रवद्रव्यं किमिति सन्देहे 'तेजो वै घृत' मित्यर्थवादात् घृतमिति निश्चीयत इति 'तेजो वै घृत' मित्यर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेनापि प्रामाण्यम् ॥

मन्त्राणामपि अध्ययनविधिना कृत्स्नस्वाध्यायस्य सफलत्वावगमात् फलवदर्थज्ञानार्थत्वमेव । नत्वदृष्टार्थत्वम् । दृष्टे

व्यतिरिक्तम् सन्देहनिर्णायकत्वरूपं कार्यमित्यर्थः ॥ अस्तीति ॥ अर्थवादानामिति शेषः ॥ प्रतीयत इति ॥ उपस्थाप्यत इत्यर्थः ॥ अञ्जनसाधनत्वेनेति शेषः ॥ एतदुपस्थितौ तत्पदप्रयोज्यत्वं तत्पदस्य यत्किञ्चिद्द्रवद्रव्यकरणकलेपनरूपाञ्जनवाचकत्वेनेति ध्येयम् ॥ अत्र फलसमर्पणादिकमपि कार्यान्तरमस्तीत्यन्यत्र स्पष्टम् ॥

ब्राह्मणानन्तरं अवसरप्राप्तं मन्त्रान्निरूपयति । मन्त्राणामिति । कृत्स्नेति । अध्ययनविधिविहिताध्ययनरूपसंस्कारसंस्कार्यतावच्छेदकीभूतस्वाध्यायत्वावच्छिन्नस्यैव फलवदर्थज्ञानोद्देशेनाक्षिप्तविधिना विधानादेतल्लाभः ॥ सफलत्वेति ॥ अन्यथा इष्टसाधनताज्ञानाभावेन प्रवृत्त्यभावे विधिशब्दशब्दितायाः प्रवर्तनायाः स्वभावहानिरिति भावः ॥ अवगमादिति ॥ एतदन्तेन मन्त्राभावेऽप्यनुष्ठानसम्भवात्क्वचिदपि तदुपयोगाभावेन न तत्प्रामाण्यमिति शङ्का व्युदस्ता ॥ तत्र दृष्टादृष्टभेदेन द्विविधे फले कतरत्प्रकृत इति विशिष्य जिज्ञासायां दृष्टमेव फलमितरव्यवच्छेदपूर्वकमाह । फलवदर्थज्ञानार्थत्वमेवेति ॥ एवकारमेव विवृणोति । न त्वदृष्टार्थत्वमिति ॥ अत्र न्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

सम्भवत्यदृष्टकल्पनाऽयोगात् । प्रयोगकाले कर्मज्ञानं विना कर्मानुष्ठानायोगात् कर्मौपयिकमर्थज्ञानं मन्त्रैः क्रियते । न चोपदेष्टृवचनादिनाप्यर्थस्मरणसम्भवादनुष्ठानोपपत्तिरिति वाच्यम् । मंत्रैरेवार्थं स्मृत्वाऽनुष्ठाने सति फलं भवति नान्यथेति

यमाह । दृष्ट इति ॥ अयमभिसन्धिः— सर्वत्र तावच्छ्रुतार्थापत्तिरदृष्टकल्पने प्रमाणम् । न च सा दृष्टमादायैवोपपत्तौ सत्यां सम्भवति । विधिविषयत्वेनानुमितस्येष्टसाधनत्वस्य दृष्टमिष्टमादायोपपन्नत्वे अनुपपत्तिरेव नात्मानं लभत इति ॥ अत्र ' एवं मन्त्राणामपि विध्यपेक्षितप्रयोगकालीनानुष्ठेयार्थस्मरणार्थत्वम् । अध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वावगमा ' दिति क्वचिदुपलभ्यमानः पाठः श्रेयान् भाति ॥ ननु फलवदर्थप्रमापकत्वमविधीनाम्मन्त्राणान्न घटते । सत्यम् । तत्स्मारकत्वन्तु निराबाधम् । न च स्मृतिरनुपयुक्ता । अनुष्ठानकाले तस्या अवश्यापेक्षितत्वादित्याह । **प्रयोगेति । कर्मज्ञानम्** ॥ कर्मतदङ्गभूतयावदर्थस्मृतिम् ॥ **कर्मौपयिकं** कर्मानुष्ठानोपयुक्तम् ॥ **अर्थज्ञानं** अर्थस्मृतिः ॥ इदमत्र बोध्यम्— मंत्रस्त्रिविधः ऋग्यजुस्सामेति । आद्यद्वयं प्रत्येकन्द्विविधम् । जपतिचोदनाचोदिततद्भिन्नभेदात् । अत्र द्वितीयस्त्रेधा करणभूतः क्रियमाणानुवादी अनुमन्त्रणार्थश्च । इमे त्रयः क्रमात्तत्तदर्थानुष्ठानप्राक्समपश्चात्कालिकाः । सामापि त्रिविधम् ऋगारूढं स्तोभारूढमुभयारूढमिति । एतेषु मन्त्रभेदेषु जपमन्त्राणामदृष्टार्थत्वमेव । तदर्थस्य प्रयोगासमवेतत्वात् । सम्भवति हि दृष्टेऽदृष्टकल्पनमन्याय्यमिति । करणमन्त्रादीनान्त्रयाणां समवेतार्थस्मारकत्वेन दृष्टार्थत्वम् । सामस्वाद्यस्य दृष्टा-

Digitization by Arya Samaj Charitable Foundation, Chennai

नियमाङ्गीकारात्, नियमेनादृष्टस्याङ्गीकारात्, तदभावे तज्जन्यादृष्टलोपे तन्मूलं फलं न सिध्यतीति कल्पनात् ।

नन्वेवं मन्त्राणां स्वस्वप्रकाश्येऽर्थे विनियोग इति फलितम् । विनियोगो नाम शेषत्वेनान्वयः । शेषत्वं नामाङ्गत्वम् । ततश्च 'इमामगृभ्णन् रशना' मिति मन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्यरूपात् लिङ्गादेव रशनाग्रहणाङ्गत्वोपपत्तेः 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति वचनं किमर्थमिति चेन्न । परिसंख्यार्थत्वात् ।

र्थत्वं स्फुटम् । प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानरूपस्य हि स्तोत्रस्य सामरूपगानसाध्यत्वमावश्यकमिति । द्वितीयस्यत्वदृष्टार्थत्वम् । स्तोभस्य सामार्थत्वेन तत्र सामसाध्यस्य कस्यचित् दृष्टस्य विरहात् । अन्त्यस्यतूभयार्थत्वमिति ॥ अङ्गीकारादिति ॥ प्रयोज्यत्वार्थकपञ्चम्यन्तद्वयं कल्पनादित्यत्रान्वेति ॥ उक्तनियमं तज्जन्यादृष्टमप्यङ्गीकृत्यैव हि तथा कल्पयितुं शक्यमिति ॥

उक्तं दृष्टार्थत्वं मन्त्राणामाक्षिपति । नन्विति ॥ किमर्थमितीति ॥ तथाचैतद्वचनप्रवृत्तिबलाद्विज्ञायते— न मन्त्राणां स्वस्वार्थप्रकाशनार्थत्वम् । तदात्वे हि अस्य मन्त्रस्यात्र विनियोग इति प्रमाणान्तरेणानिश्चयाद्वचनमर्थवद्भवतीत्याशयः ॥ केवलमङ्गत्वबोधनन्न वचनप्रवृत्तिप्रयोजनम्, येन वचनानर्थक्यं मन्त्राणां समवेतार्थस्मारकत्वे प्रसज्येत । अपि तु परिसंख्यादिकन्तत्प्रयोजनम् । एवञ्च मन्त्राणान्दृष्टार्थत्वं लिङ्गस्य विनियोजकत्वञ्चाङ्गीकृत्यापि वचनसाफल्यमव्याहतमित्यभिसन्धाय पक्षं परावर्तयति । नेति ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

घयनप्रकरणे अश्वरशनाग्रहणं गर्दभरशनाग्रहणञ्चेति द्वयमस्ति। तत्र लिंगादश्वरशनायां मन्त्रप्राप्तावुच्यमानायां लिंगाविशेषाद्गर्दभरनायामपि मंत्रः प्राप्नुयात्। अतोऽश्वरशनायामेव मंत्रः कार्यः न गर्दभरशनायामिति मन्त्रनिवृत्तिरूपपरिसंख्यार्थोऽयं विधिः॥

सा च परिसंख्या त्रिदोषा– स्वार्थत्यागः परार्थस्वीकारः प्राप्तबाधश्चेति। तत्र 'अश्वाभिधानीमादत्त' इति वाक्यस्य अनेन मन्त्रेणाश्वरशनादानं कुर्यादिति स्वार्थः। स च त्यक्तः। गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः। स च स्वीकृतः गर्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्य अनेन बाधश्चेति

परिसंख्या द्विविधा शाब्दी आर्थीचेति। आर्थ्यपि द्वेधा प्राप्ताप्राप्तपरिसंख्याभेदात्। तत्र शाब्दी 'नानृतं वदे' दिति। अत्र परिसंख्यानस्य नञ्शब्देनोपात्ततया शाब्दी परिसंख्या। यादृशपरिसंख्याशास्त्रप्रवृत्तेः पूर्वमेव तत्परिसंख्येयार्थप्रापकप्रमाणस्य प्रवृत्तिः सा प्राप्तपरिसंख्या। सैषा दोषत्रयशालिनीति विशेषः। तस्मात्तामेव कीर्तयन्दोषत्रयं व्युत्पादयति। साचेति॥ अत्र इतिशब्दार्थस्याभेदस्य त्रिदोषेति बहुव्रीहिघटकोत्तरपदार्थदोषेष्वन्वयः। 'सा द्विविधा नित्यानित्याचेती' त्यादाविव तथाऽन्वये बाधकाभावात्। यद्वा स्वार्थेत्यादि भिन्नं वाक्यम्। ते दोषा इतिचाध्याहार्यम्॥ तत्रेति॥ तादृशप्राप्तपरिसंख्यास्वन्यतमेत्यर्थः॥ त्यक्तइति॥ लिङ्गादेव प्राप्तत्वात 'अप्राप्ते शास्त्रमर्थव' दिति न्यायेन प्राप्तविधानस्यायुक्तत्वाच्चेतिभावः। स्वीकृत इति॥ लक्षणयेति शेषः॥ ननु दोषाणां कथमङ्गीकार

Digitization by Arya Samaj Charitable Foundation, Chennai

त्रिदोषा परिसंख्या गत्यभावादङ्गीकृता । गत्यन्तरे सति सा न युक्ता ।

इत्यत्राह । **गत्यभावादिति** ॥ तथा च सकलवाक्यवैयर्थ्यमपेक्ष्य वरमेवमङ्गीकारः । न च प्राप्तस्यैव पुनस्तत्र विधानमतिशयार्थमिति लक्षणाश्रयणे प्रमाणाभाव इति शंक्यम् । 'नास्तिशब्दस्यातिभार' इति न्यायादिति ॥ त्रैदोष्याङ्गीकरणस्य गत्यभावैकहेतुकत्वं व्यतिरेकेण द्रढयति । **गत्यन्तर इति** ॥ अत्रोदाहरणं गृहमेधीयप्रकरणपठित आज्यभागविधिः । तस्य हि प्रकृतगृहमेधीययागगतं यदातिदेशिकाङ्गानपेक्षित्वरूपमपूर्वत्वन्तत्फलकत्वे सम्भवति अतिदेशप्राप्ताज्यभागव्यतिरिक्तदार्शपूर्णमासिकाङ्गकलापपरिसंख्यापकत्वं त्रैदोष्यभिया नाङ्गीक्रियत इति ॥ इदमत्राभिधेयम्– 'इमामगृभ्ण' न्निति नेयं प्राप्तपरिसंख्या । दुर्बलस्य लिंगस्य श्रुतित्वेन प्रबलादस्माद्वाक्यात्पूर्वं प्रवृत्त्यसम्भवात् । तस्माद्वस्तुतः प्रमाणान्तरेणाश्वाभिधान्यामप्राप्तस्यैव मन्त्रस्य द्वितीयाश्रुत्या तत्र विधानात्, तथाऽपि प्रमाणान्तरेणैव प्राप्तिसम्भवे पुनर्विधानप्रयोजने जिज्ञासिते शेष्यन्तरपरिसंख्यानस्यैव विधितात्पर्याविषयत्वावधारणादप्राप्तपरिसंख्यैवासौ । एवञ्च स्वार्थस्यैव विधानान्न स्वार्थत्यागः । इतरपरिसंख्यानस्यार्थत्वान्न तदर्थं लक्षणयाऽर्थान्तरस्वीकारः । शीघ्रप्रवृत्तया श्रुत्या दुर्बललिंगप्रवृत्तेः प्रतिबद्धत्वान्न शेष्यन्तरे मन्त्रस्य प्राप्तिरिति न प्राप्तबाध इति । प्राप्तपरिसंख्योदाहरणन्तु 'पञ्च पञ्चनखा भक्ष्या' इति । इयं हि, पञ्चपञ्चनखभक्षणस्य रागप्राप्तेस्तद्विधानायोगाद्रागप्राप्तपञ्चाधिकपञ्चनखभक्षणपरिसंख्याने विधितात्पर्यमावश्यकमिति भवति प्राप्तपरिसंख्येति ॥ नचात्रा-

Digitization by Arya Samaj Charitable Foundation, Chennai

एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः । यथा आग्नेयोऽष्टकपालसंस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः । तत्र अपूपविशेषस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायामनियमेन यस्य कस्यचिद्द्रव्यस्य प्राप्तौ 'व्रीहिभिर्यजेते' ति वाक्यात् व्रीहयो नियम्यन्ते । एवं 'यवैर्यजेते' ति वाक्याद्यवा अपि नियम्यंते। तयोरेकार्थत्वाद्विकल्पः । एवम् 'अतिरात्रे षोडशिनं गृह्णाती'ति अतिरात्रे षोडशिग्रहणं विहितम् । तथा 'नातिरात्रे षोडशिनं गृह्णाती'ति प्रतिषेधात् ग्रहणाभावो विहितः।तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोरेकस्मिन् प्रयोगे अनुष्ठातुमशक्यत्वात् क्वचित् प्रयोगे ग्रहणानुष्ठानं प्रयोगान्तरे तदभावानुष्ठानमिति

पि पूर्वप्रवृत्त्या फलतः परिसंख्यात्वम् । रागप्राप्तभक्षणस्य प्रयोजनवदर्थज्ञानवत् चयनापूर्वसाधनीभूताश्वाभिधानीवद्वा श्रूयमाणविध्युद्देश्यत्वानुभवायोग्यत्वेन कल्प्यफलोद्देशेन भक्षणविधाने फलकल्पनस्यैव दोषत्वेन च परिसंख्याया एव श्रुतविधितात्पर्यविषयत्वस्यावश्यकत्वात् ॥

दोषप्रसङ्गात् विकल्पदोषान् प्रतिपादयितुमाह । एवमिति ॥ विकल्पाश्रयमभिधाय विकल्पप्रयोजकमाह । तयोरिति ॥ एकार्थत्वादिति ॥ एकार्थयोर्व्रीहियवयोः प्रत्येकं यागसाधनत्वेन श्रुतयोः आग्नेयादीनामेकस्वर्गार्थानां प्रयोगवचनवत्समुच्चयग्राहकप्रमाणाभावादित्यर्थः । तथा च समुच्चयग्राहकप्रमाणाभावविशिष्टमेकार्थत्वं विकल्पप्रयोजकमिति फलितम् ॥ द्रव्ययोर्विकल्पमुक्त्वा क्रियातदभावयोराह । एवमिति ॥ परस्परेति ॥ अनेन एककर्त्वर्थयोर्ग्रहणाग्रहणयोर्विकल्पप्रयोजकः समुच्चयग्राहकप्रमाणाभावस्सूचितः ॥ दोषानाह ।

Digitization by Arya Samaj Foundation Chennai and eGangotri

तत्रापि विकल्पः । स चाष्टदोषदुष्टः । तथाहि-पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः, ततो द्वितीयप्रयोगे यवानुष्ठाने यवशास्त्रस्य पूर्वं त्यक्तं यत् प्रामाण्यं तत्स्वीकारः, स्वीकृतं यदप्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः । एवं पूर्वं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत् प्रामाण्यं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति व्रीहिशास्त्रे चत्वारो दोषा इति ॥

अष्टदोषदुष्टविकल्पः क्वचिदेकार्थत्वात् । एककार्यकारि-

सचेति ॥ व्रीहिप्रयोगे यवानुष्ठानशून्ये प्रयोगे ॥ प्रमापकत्वरूपप्रामाण्यत्यागासम्भवादाह । स्वार्थेति ॥ यवशास्त्रइति ॥ यवाननुपादाय प्रयोगे एतच्छास्त्रे द्वौ दोषौ । तादृशप्रयोगानन्तरकालिके तानुपादाय प्रयोगे द्वाविति चत्वारो दोषाः ॥ एवं व्रीहिस्थलेऽपि विवेचनीयम् ॥ द्वयोर्विकल्पे एवमष्टौ दोषाः । यत्र तु त्रयाणान्तत्र द्वादश एवमेकैककोट्याधिक्ये चत्वारश्चत्वारो दोषा अधिका इति द्रष्टव्यम् ॥

विकल्पो द्वेधा भवति समुच्चयग्राहकप्रमाणाभावविशिष्टैकार्थत्वप्रमाणकः वचनप्रमाणकश्च । ताविमौ क्रमेणाह । अष्टेत्यादिना ॥ विकल्पे अष्टदोषदुष्टत्वविशेषणं विभज्य तत्प्रदर्शनस्य प्रासङ्गिकत्वं सूचयितुम् ॥ एकार्थत्वादिति ॥ उक्तोऽर्थः ॥ विकल्पो नाम तेन सहाननुष्ठेयत्वे सति तत्कार्यकारित्वम् । तत्र विशेष्यदलसम्पादनमुक्त

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वादित्यर्थः । यथा व्रीह्यादौ । तत्र व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनक्षमत्वाद्विकल्पः । क्वचित् वचनबलात् । यथा 'बृहत् पृष्ठं भवती'ति बृहत्सामसाध्यं पृष्ठनामकं स्तोत्रं विहितं । 'रथंतरं पृष्ठम्भवती'ति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते । स्तोत्रञ्च प्रयाजादिवदपूर्वार्थत्वादर्थकर्म । साम तु संस्कारकर्मत्वाद्गुणकर्म । स्तोत्रसाधनीभूतस्तोत्रीयाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात् । प्रगीतमन्त्रसाध्यमिन्द्रादगुणिनिष्ठगुणाभिधानं स्तोत्रं । प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्यमित्यर्थः । अप्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं शस्त्रम् । गानक्रियाविशेषः साम । स्तोत्रसाधनीभूता ऋचः स्तोत्रीयाः । तद्वतत्रिवृत्पञ्चदशत्वादिसङ्ख्याविशेषः स्तोम इत्येतेषां भेदः । तथाच बृहद्रथन्तरपृष्ठयोर्भिन्नापूर्वार्थत्वेन एकार्थत्वाभावेऽपि 'बृहद्वा पृष्ठं कार्यं,' 'रथन्तरं वा पृष्ठं

विकल्पप्रमाणघटकैकार्थत्वदळकृत्यमित्याह । तत्र व्रीहीति ॥ एवमेव दळान्तरस्य विशेषणसम्पादकत्वन्द्रष्टव्यम् ॥ सामसाध्यत्वं स्तोत्रस्य विशदयति । स्तोत्रमिति ॥ अपूर्वार्थत्वादिति ॥ स्तुतशस्त्राधिकरणन्यायेनेति शेषः ॥ अङ्गीकारादिति ॥ 'कर्मवा विधिलक्षण' मिति नवमाद्वितीयद्वितीयानुरोधेनेति द्रष्टव्यम् ॥ प्रसंगादेव स्तोत्रशस्त्रसामस्तोत्रीयास्तोमपदानामर्थान् क्रमेणाह प्रगीतेत्यादिना ॥ तथाचेति ॥ 'बृह' दित्यादिवाक्यद्वयविहितयोः स्तोत्रयोरर्थकर्मत्वेचेत्यर्थः ॥ एकार्थत्वाभावेऽपीति ॥ एतेन पूर्वन्यायाविषयत्वं सूचितं ॥ इमावेव विकल्पभेदौ न्यायगम्यो वाचनिकश्चेति व्यवहृतावन्यत्र ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्य'मिति वचनबलादेव विकल्पः। क्वचिद्व्यवस्थितविकल्पः। यथा द्वितीयप्रयाजकर्मणि नाराशंसतनूनपान्मन्त्रयोरेकार्थत्वाद्विकल्पः। स च 'राजन्यवासिष्ठानां नाराशंसो द्वितीयप्रयाजस्तनूनपादन्येषा'मितिवाक्यात् व्यवस्थित इति व्यवस्थितविकल्पः॥

तदेवं चोदनाऽपरपर्यायाणां विधिवाक्यानामंशत्रयविशिष्टभावनाविधायकत्वात् प्रामाण्यम्। उद्भिदादीनां नामतया अर्थवादानां विधेयप्राशस्त्यपरतया मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्माधर्माख्येऽर्थे प्रामाण्यं स्थितम्॥

स्मृतयोऽपि मन्वादिप्रणीता वेदमूलकत्वादष्टकादौ धर्मे

पुनरपि विकल्पो द्विविधो व्यवस्थितोऽव्यवस्थितश्च। तत्राद्यमाह। क्वचिदिति॥ अनन्तरस्तु व्रीहियवादिस्थल इति स्पष्टम्॥

धर्माधर्मप्रमाणेषु वेदस्मृत्याचारेषु वेदनिरूपणमुपसंहरति। तदेवमिति॥ उद्भिदादीनामिति॥ एतदनुरोधेनैव, नामधेयनिरूपणस्य नान्यप्रसंगागतत्वमिति भाति॥

स्मृतिप्रामाण्यमाह। स्मृतयोऽपीति॥ दृढकर्तृस्मरणेनासां पौरुषेयत्वस्यैव वाच्यतया न वेदवत्त्वातन्त्र्येण प्रामाण्यमिति व्यञ्जयन्नाह। मन्वादिप्रणीता इति॥ वेदमूलकत्वादिति॥ अथात्र कथं वेदमूलकत्वसिद्धिः अनुमितेः पूर्वं तदनवगमाद्व्याप्तेरेवासिद्धत्वादिति चेन्न। पौरुषेयतया यत्किञ्चिन्मूलकत्वे आवश्यके प्रत्यक्षस्यालौकिकेष्वर्थेष्वप्रवृत्त्या अत एव तदुपजीविनानुमानादीनां सुतरां तत्र प्रवर्ति-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रमाणम् । 'औदुम्बरी सर्वा वेष्टयितव्ये'ति स्मृतिरप्रमाणम् । 'औदुम्बरीं स्पृष्ट्वोद्गाये'दिति प्रत्यक्षश्रुतिविरुद्धत्वात् । सर्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्त्तुमशक्यत्वात् । 'वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाती'ति स्मृतिरप्यप्रमाणम् । श्रुत्याविरुद्धत्वेऽपि लोभमूलकत्वात् ॥

तथा शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम् । मातुलसुतापरिणयनादिशिष्टाचारस्त्वप्रमाणम् । 'मातु-

---

तुमशक्तत्वेन मूलत्वायोगात् वैदिकैस्त्रैवर्णिकैर्धर्मत्वेन परिगृहीततया आन्त्यादेरपि तथात्वानुपपत्तेः परिशेषादेव वेदस्यैव तन्मूलत्वं निश्चीयत इति ॥ क्वचित्स्मृतिविशेषे प्रामाण्यमपवदति । औदुम्बरीति ॥ अपवदने बीजमाह । औदुम्बरीमिति ॥ ननु स्मृतिविरोधात् श्रुतिरेवाप्रमाणमस्तु । अत्राह । प्रत्यक्षेति ॥ यद्वा श्रुतौ मूलभूतायामनुमितायां सत्यां, विरुद्धार्थप्रतिपादकत्वेऽपि स्मृतिविशेषस्यानुमितश्रुतिमूलकत्वेनाविशेषादविरुद्धार्थस्मृतेरिव प्रामाण्यन्दुर्वारमित्यत्राह । प्रत्यक्षेति ॥ अयम्भावः— स्मृतिप्रामाण्याय तादृशार्थप्रतिपादकश्रुतेरनुमेयतया ततः पूर्वमेव प्रवर्तमानया स्मृतिविरुद्धमर्थं प्रतिपादयन्त्या प्रत्यक्षश्रुत्या मूलभूतश्रुत्यनुमानप्रतिबन्धान्नानुमितश्रुतिमूलकत्वेन श्रुतिविरुद्धस्मृतेः प्रामाण्यं सम्भवतीति ॥ मूलभूतश्रुत्यनुमानसम्भवेऽपि स्वतन्त्रप्रत्यक्षश्रुत्यर्थस्यैवानुष्ठेयतया श्रुतिविरुद्धस्मृतेरननुष्ठापकत्वलक्षणमप्रामाण्यमस्त्येवेति ध्येयम् ॥ विरोधं विशदयति । सर्वेति ॥

आचारप्रामाण्यमाह । तथेति ॥ स्मृतिविरोधे न स प्रमाणमित्याह । मातुलसुतेति ॥ 'तयोश्च वेदः स्मृतिराचारश्च प्रमाण'मिति

Digitization by Arya Samaj Charitable Foundation, Chennai

लस्य सुतामूढ्वे'त्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात् । तदेवं श्रुतिस्मृत्याचाराणां धर्माधर्मयोः प्रामाण्यमुक्तम् ॥

स च धर्मः परस्परं भिन्नः । भेदकप्रमाणानि तु शब्दान्तरादीनि । तथाहि– यागदानहोमानां यजति, ददाति, जुहोतीत्यपर्यायशब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः । स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं दानम् । 'समिधो यजती' त्यादीनां पञ्चानां वाक्यानां मध्ये एकस्य कर्मविधायकत्वमन्येषां तस्मिन् कर्मणि गुणविधायकत्वमित्यत्र नियामकाभावात्सर्वेषां कर्मविधायकत्वे स्थिते विहितस्य कर्मणः पुनर्विधानं व्यर्थमिति पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षयोत्तरवाक्यविहि-

---

ग्रन्थारम्भे उपक्रान्तं धर्माधर्मप्रमाणनिरूपणन्निगमयति । तदेवमिति ॥

एवं प्रथमाध्यायार्थं धर्माधर्मप्रमाणन्निरूप्य द्वितीयाध्यायार्थं भेदं वर्तयति । सचेति ॥ शब्दान्तरादीनि शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तराणि ॥ शब्दान्तराद्भेदमाह । यागेति ॥ यागहोमपदार्थयोः प्रागेवोक्तत्वाद्दानपदार्थमाह । स्वस्वत्वेति ॥ अभ्यासाद्भेदमाह । समिध इति ॥ 'तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इतीमानि वाक्यान्यादिपदार्थः ॥ नियामकाभावादिति ॥ मन्त्रवर्णादेव देवताप्राप्तिसम्भवेन एकैकस्मिन्नपि वाक्ये द्वितीयान्तपदेन देवताविधानानुपपत्तेरत्र देवताविधिरत्र नेति नियामकं न किञ्चिदस्तीत्यर्थः ॥ स्थित इति ॥ एतावता प्रकृते यजतिपुनःश्रुतेः धात्वर्थभिन्नविधायकत्वाभावरूपमनन्यपरत्वापरपर्यायमविशेषत्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य कर्मणो भेदः सिध्यतीत्येतादृशस्थलेष्वविशेषपुनःश्रुति-रूपाद्यजतिपदाभ्यासात् कर्मभेदः । 'तिस्र आहुतीर्जुहोती' त्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोत्यर्थे होमे त्रित्वसङ्ख्या-न्वयात्परस्परभिन्नास्त्रयो होमा इति सङ्ख्ययाऽत्र कर्मभेदः । 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्र-दक्षिणेन यजेते' ति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योति-राद्याख्यानां त्रयाणां यागानां ज्योतिष्टोमसंज्ञापेक्षया पृथक्सं-ज्ञात्रयकरणात् ज्योतिष्टोमापेक्षया भेदः । भिन्नसंज्ञावशादेव त्रयाणां परस्परं भेद इति संज्ञया कर्मभेदः । तथा 'तप्ते पयसि

विशेषरहितत्वमस्तीति दर्शितम् ॥ अविशेषेति ॥ अत्र पुनःश्रुति-मात्रस्याभ्यासत्वे 'य एवं विद्वान्पौर्णमासीं यजते, य एवं विद्वानमा-वास्यां यजते' इत्यत्रापि यजतेरभ्यासादाग्नेयादिकमपेक्ष्य भिन्नकर्मविधा-नापत्तिः । अविशेषत्वरूपानन्यपरत्वेन विशेषणे तु आग्नेयादिसमुदाय-सिद्धिपरत्वादभ्यासस्य न साऽऽपत्तिरिति ध्येयम् ॥ संख्यया कर्मभेद-माह । तिस्र इति ॥ नचात्र श्रूयमाणं त्रित्वं एकस्यैव होमस्याभ्या-समात्रं बोधयिष्यति न तु भेदमिति शङ्कनीयम् । एतद्वाक्यप्रवृत्तेः प्राक् एतद्वाक्यविधेयकर्मणोऽनवगततया एतस्मिन्नेव वाक्ये विधाना-वसरे स्वाश्रयवृत्तिस्वाश्रयप्रतियोगिकभेदाविनाभूतस्य त्रित्वस्यान्वये सति विजातीयहोमत्रयस्यैव कल्पनौचित्यात् । इतरथा एक एव होमः स तु त्रिरभ्यसितव्य इति बुद्धिव्यापारगौरवापत्तेः ॥ संज्ञया भेदमाह । अथेति ॥ यथा ज्योतिष्टोमापेक्षया ज्योतिर्विश्वज्योतिस्सर्वज्योतिषां संज्ञया भेदस्तथा तया त्रयाणामेषां परस्परभेदोऽपीत्याह । भिन्नसं-

Digitization by Arya Samaj Charitable Foundation, Chennai

दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन ' मित्यत्र ' सा वैश्वदेवी ' ति वाक्ये विश्वदेवदेवताऽऽमिक्षाद्रव्यसम्बन्धानुमितो यागो विधीयते । ' वाजिभ्यो वाजिन ' मित्यत्रापि वाजिदैवत्यवाजिनद्रव्यककर्मान्तरं विधीयते । न तु पूर्वविहिते वैश्वदेवयागे वाजिनद्रव्यरूपगुणो विधीयते । पूर्वयागस्यामिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य निवेशायोगात् । न च व्रीहियवषद्विकल्पः । वाजिनामिक्षयोः समशिष्टत्वाभावात् । विषमशिष्टयोर्विकल्पायोगात् । वैश्वदेवयागोत्पत्तिवाक्य एवामिक्षागुणः शिष्यत इति उत्पत्तिशिष्टः । शिष्यते विधीयत इत्यर्थः । वैश्वदेववाक्यादुत्पन्ने कर्मणि वाक्यान्तरेण शिष्टो हितो वाजिनगुण उत्पन्नशिष्टः । तयोर्मध्ये ह्युत्पत्तिशिष्टः प्रबलः । कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्रमितत्वात् । उत्पन्नविशिष्टो वाजिनगुणोऽनन्तरप्रमितो विलम्बितत्वेन दुर्बलत्वात् पूर्वकर्मणि निवेशमलभमानो वाजिरूपदेवतांतरसम्बन्धात् स्ववाक्यस्य कर्मान्तरविधायकत्वमानयतीति गुणात् भेदः । तत्र

ज्ञापशादेवेति ॥ गुणाद्भेदमाह । तथेति ॥ कर्मान्तरमिति ॥ वैश्वदेवाद्भिन्नं कर्मेत्यर्थः ॥ निवेशायोगादिति ॥ तथा च वाक्यान्तरविहितकर्मणि अनिविशमानो गुणः कर्मभेदबोधकइति भावः ॥ विकल्पेन निवेशमाशंक्य निषेधति । नचेति ॥ वाजमन्नं येषामस्ति ते वाजिनः इति व्युत्पत्त्या वाजिभ्य इति पदेन पूर्ववाक्यविहितान् विश्वान्देवाननूद्य वाजिनविधिर्न सम्भवति । वाजिपदस्य देवताविशेषे रूढत्वादिति सूचयन्नाह । देवतान्तरेति ॥ सम्बन्धादिति ॥ याग-

Digitization by Arya Samaj Charitable Foundation, Chennai

घनीभूतं पय आमिक्षा शिष्टं जलं वाजिनम् । तथा कुण्डपायिनामयने श्रूयते ' उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोती ' ति। अत्र पूर्वकर्म किञ्चिदपि सन्निहितं न भवति । अपूर्वकर्मसन्निधानरूपात् प्रकरणान्तरात् प्रसिद्धाग्निहोत्रधर्मकं तन्नामकं कर्मा-

---

वाचकपदाश्रवणेऽपि द्रव्यदेवतासम्बन्धेन श्रुतेन यागविशेषोऽनुमास्यत इति प्रतिपादयितुमिदमुक्तम् ॥ प्रकरणान्तराद्भेदमाह । तथेति ॥ कुण्डेति ॥ कुण्डपायिनामयनाभिधे सत्र इत्यर्थः ॥ अनेकदिनसाध्यस्सोमयागो द्वेधा, अहीनस्सत्रञ्च । तत्र यजतिपदघटितवाक्यविधेयोऽनियतयजमानसंख्याकोऽहीनः । आसीरन्नुपेयुरिति विधिविहितं सत्रम् । तत्र द्विरात्रमारभ्य एकादशरात्रान्तं सर्वेऽहीनाः । त्रयोदशरात्रमारभ्य सर्वाणि सत्राणि । द्वादशाहस्य तु सत्रत्वमहीनत्वञ्चेति स्थितम् । किञ्चिदपीति ॥ अत्र सम्भावितस्याग्निहोत्रसन्निधानस्यैव निषेध्यत्वेऽपि, यथा सोमयागादिकमन्यत्कर्म न सन्निहितं भवति तथैवाग्निहोत्रमपि न सन्निहितं भवतीति दृष्टान्तस्यापि प्रतिपादनाय ' किञ्चिदपि सन्निहितन्नभवती ' ति कर्मान्तरसन्निधानसाधारण्येन निषेध इति ज्ञेयम् ॥ अपूर्वेति ॥ अपूर्वस्याप्रकृतस्य वाक्यान्तरेणाप्राप्तस्य कर्मणः सन्निधानादुपस्थितेरित्यर्थः ॥ प्रकरणान्तरादिति ॥ अन्यत् यत्प्रतियोगिको भेदः प्रमातव्यस्तादृशकर्मसम्बन्धिप्रकरणाद्भिन्नं प्रकरणं प्रकरणान्तरम् । एतत्प्रयोज्यत्वादपूर्वकर्मसन्निधानमपि प्रकरणान्तरम् ॥ ननु ' अग्निहोत्रं जुहोती ' ति वाक्यविहितस्य कर्मणोऽत्रोपस्थित्यभावे तत्संज्ञाभूतस्याग्निहोत्रपदस्य श्रवणन्नोपपद्यते । तदाह । तन्नामकमिति ॥ अग्निहोत्रनामकमित्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न्तरं विधीयते । न त्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुण-विधिः । प्राप्ते कर्मणि आनन्तर्यमासरूपानेकगुणविधौ वाक्य-भेदापत्तेरिति प्रकरणान्तरादत्र कर्मभेदः । प्रसिद्धाग्निहोत्रं नैय-

---

यथा उक्तवाक्यविहितस्य कर्मणोऽग्निहोत्रसंज्ञा तथा प्रकृतवाक्यवि-हितस्यापीति नानुपपत्तिरिति भावः ॥ ननु प्रयोगप्राचुर्यात् 'अग्नि-होत्रं जुहोती' ति वाक्यविहिते कर्मण्येवाग्निहोत्रपदं शक्त्या निरूढ-लक्षणया वा वर्तते । नचैवं प्रकृतेऽपि वर्तिष्यत इति वक्तुं युक्तम् । 'अन्यायश्चानेकार्थत्व' मिति न्यायात् ॥ तथा च कथं मासाग्निहोत्र-स्य तत्संज्ञकत्वमितिचेदाह । **प्रसिद्धाग्निहोत्रधर्मकमिति** ॥ अयं भावः । सत्यं न शक्तिर्निरूढलक्षणा वा मासाग्निहोत्रेऽग्निहोत्रपदस्य तथाऽपि तु स्वशक्यप्रसिद्धाग्निहोत्रसम्बन्धिधर्मपदवाच्याङ्गसदृशाङ्गक-लापवत्वसम्बन्धेन लक्षणया तस्य पदस्य तत्र प्रवृत्तौ न किञ्चिदनुपप-न्नमिति । अयमेव नामातिदेश इत्युच्यत इत्यलम् । नन्वग्निहोत्रमिति नाम श्रूयमाणं प्रसिद्धाग्निहोत्रं सन्निधापयिष्यतीति नात्रापूर्वस्य कर्म-णस्सन्निधानरूपं प्रकरणान्तरमात्मानं लभते । नैवमित्याह । **सत्विति** ॥ **आनंतर्येति** ॥ 'उपसङ्ग्रिश्चारित्वे' ति क्त्वाप्रत्ययार्थोऽयम् ॥ **वाक्य-भेदापत्तेरिति** ॥ तथा च प्रसिद्धाग्निहोत्रस्योपस्थितावपि तत्रानिविश-माना अनेके गुणा अत्र वाक्ये उपस्थितस्य कर्मणोऽपूर्वत्वमापादय-न्तीति अपूर्वकर्मसन्निधानरूपं प्रकरणान्तरमप्रतिहतमिति भावः ॥ एषा तु प्रकरणान्तरस्य भाष्यानुसारिणी सरणिः ॥ अत्र गुणस्यैव भे-दकत्वं भंग्यन्तरेणोक्तम् । यत्रैक एव गुणः 'मासन्दर्शपूर्णमासाभ्या' मित्यादौ तत्र प्रकरणान्तराद्भेदानापत्तिश्चेति वार्तिककारः प्रकरणान्त-

Digitization by Arya Samaj Charitable Foundation, Chennai

मिकाग्निहोत्रं नित्याग्निहोत्रमिति यावत्। तदेवं शब्दान्तराभ्यासङ्ख्यासंज्ञागुणप्रकरणान्तरैः कर्मभेदो दर्शितः॥

तत्र वेदादिप्रमेयोऽर्थस्त्रिविधः— क्रत्वर्थः पुरुषार्थ उभयार्थश्चेति। प्रयाजादिः क्रत्वर्थः। फलं तत्करणञ्च पुरुषार्थः यथा—स्वर्गादिर्ज्योतिष्टोमादिश्च। दध्यादि तूभयरूपम्। 'दध्ना जुहोती' ति फलासंयुक्तवाक्येन क्रत्वर्थत्वात्। 'दध्नेन्द्रियकामस्य जुहुया' दित्यनेन फलाय विधानात् पुरुषार्थत्वात्। तदुक्तम्— 'एकस्य तूभयत्वे संयोगपृथक्त्व' मिति। संयोगो वाक्यम्। तस्य पृथक्त्वं भेदः एकस्य उभयार्थत्वे नियामक इत्यर्थः। क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः। पुरुषार्थे फलं प्रयोजकम्। प्रयोजकत्वं नामानुष्ठापकत्वमित्यर्थः।

रमन्यथा वर्णयाञ्चकार। तद्यथा— अनुपादेयगुणसहितः पूर्वकर्मासन्निधिरेव प्रकरणान्तरम्। यत्र अनुपादेयो गुणो नास्ति तत्र 'यदाहवनीये जुहोती' त्यादौ सत्यप्यसन्निधौ कर्मभेदाभावात् सन्निधिसत्वेऽनुपादेयगुणसत्वेऽपि 'सायं जुहोती' त्यादौ तदभावाच्चेति॥ अथ केऽनुपादेयगुणाः? तदुच्यते— देशः कालो निमित्तञ्च फलं संस्कार्यमेव च। इति मीमांसकैरुक्तमनुपादेयपञ्चकम्॥

तृतीयाध्यायार्थः प्रसंगात्प्रागेव निरूपितः। अथाद्य चतुर्थाध्यायार्थं प्रयोजकत्वं प्रदर्शयितुमाह। सचेति॥ क्रत्वर्थत्वपुरुषार्थत्वे व्याख्याते॥ फलमिति॥ अस्य पुरुषार्थत्वं भाक्तम्॥ क्रत्वर्थपुरुषार्थयोः प्रयोजकं क्रमेणाह क्रत्वर्थे प्रयाजादा वित्यादिना॥ उभयार्थस्योभयं प्रयोजकमिति स्पष्टत्वान्नोक्तम्॥ नन्वनुष्ठापकत्वरूपं प्रयोज-

Digitization by Arya Samaj Charitable Foundation, Chennai

विधिर्यदर्थं यदनुष्ठापयति स तत्र प्रयोजकः । दर्शादि विधिः स्वर्गाद्यर्थं दर्शादिकमनुष्ठापयतीति स्वर्गादिर्दर्शादौ प्रयोजकः । प्रयाजादिविधिः प्रयाजादीन् दर्शाद्यर्थमनुष्ठापयतीति दर्शादिः प्रयाजादीनां प्रयोजकः । दध्यानयनविधिर्दध्यानयनमामिक्षार्थमनुष्ठापयति न वाजिनार्थम् । आमिक्षार्थं दध्यानयनानुष्ठाने

कत्वं विधेरेव नान्यस्य सम्भवतीतिचेदाह । विधिरिति ॥ यद्यपि मुख्यप्रयोजकत्वं विधेरेव तथाऽपि स यदर्थमनुष्ठापयति तस्यापि प्रयोजकत्वव्यवहारश्शास्त्रकृतामिति भावः ॥ विशिष्य प्रयोजकान्युदाहरति । दर्शादीति ॥ प्राधान्यात्क्रममुल्लंघ्य प्रथममेतदुक्तिः ॥ प्रयाजानां प्रयोजक इति ॥ अत्र 'दध्ना जुहोती'ति 'दध्नेन्द्रियकामस्य जुहुया'दिति च विधिद्वयं होमार्थमिन्द्रियार्थञ्च दध्यनुष्ठापयतीति दध्नः होम इन्द्रियमित्युभयं प्रयोजकमित्यप्यनुसन्धेयम् ॥ प्रयोजकापवादत्वेनाप्रयोजकोऽपि चतुर्थाध्यायार्थः । स द्विविधः । स्वांगस्याप्यप्रयोजकः कश्चित् । इतरांगं सत्स्वोपकारकं यत्तस्याप्रयोजकः कश्चित् ॥ तत्रान्त्यमुदाहरति । दधीति ॥ 'तप्ते पयसि दध्यानयती'ति विधिरित्यर्थः ॥ नन्वामिक्षावाजिनयोर्द्वयोरपि, पयसि दध्यानयनादेकस्मान्निष्पत्त्यविशेषेण तस्योभयांगत्वावगमात् कथमामिक्षैव तत्प्रयोजिका न तु वाजिनमित्यत्राह । आमिक्षार्थमिति ॥ 'पयो वा तत्प्रधानत्वा'दित्याष्टमिकन्यायेन दध्यानयनसंस्कृतपयस एवामिक्षात्वात् दध्यानयनविधिना च स्वघटकपयश्शब्दोपात्तामध्याहृतांवाऽऽमिक्षामुद्दिश्यैव दध्यानयनविधानादामिक्षार्थमेव स विधिर्दध्यानयन-

Digitization by Arya Samaj Charitable Foundation, Chennai

सति वाजिनस्य स्वतः सिद्धत्वात् । अत आमिक्षैव दध्यानयने प्रयोजिका । न वाजिनम् । 'पुरोडाशकपालेन तुषानुपवपती' ति तुषोपावापङ्गत्वेन पुरोडाशकपालं विधीयते । तथापि तुषोपवापः कपालस्य प्रयोजको न भवति । पुरोडाशार्थमुपात्तेनैव कपालेन तुषोपवापसिद्धेः । किन्तु पुरोडाश एव कपालस्य प्रयोजक इत्याद्यूह्यम् ।

ननु विधिना साङ्गं प्रधानं कर्त्तव्यतया चोद्यते । तत्राङ्गानां प्रधानानाञ्च कर्मणां बहुत्वात् क्रमेणानुष्ठानं वाच्यम् । तत्क्रमनियामकं प्रमाणं किमिति चेन्न । श्रुत्यादीनामेव क्रमनियामकत्वात् । तथाहि– 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयती' त्यत्र श्रुत्वा गृहपतिदीक्षानन्तरं ब्रह्मदी-

---

मनुष्ठापयतीति भावः ॥ स्वत इति ॥ वाजिनप्रयोज्यत्वं विनेत्यर्थः ॥ आद्यमप्रयोजकमाह । पुरोडाशेति ॥ पुनरपि प्रयोजको द्विविधः कश्चित्स्वार्थं प्रयोजयति यथा स्वर्गो यागम् । परार्थन्तु कश्चित् यथा निमित्तं पापध्वंसार्थं नैमित्तिकं कर्म प्रयोजयतीति । एवं स्वरूपोपादानधारणेषु कश्चिदेकस्यैव कश्चिदुभयोः कश्चित्तु त्रयाणामपि प्रयोजको भवतीति पुनरनेकधा प्रयोजक इत्यन्यत्र विस्तर इत्याशयेनाह । इत्याद्यूह्यमिति ॥

अथ पञ्चमाध्यायार्थभूतक्रमप्रमाणानि दर्शयितुं तदनुगुणमाक्षेपमुपाक्षिपति । नन्विति ॥ विधिना प्रयोगविधिना ॥ श्रुत्यादीनां श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तीनाम् ॥ श्रुत्येति ॥ त्वारूपयेति शेषः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

क्षेति श्रौतक्रमः । 'समिधो यजति', 'तनूनपातं यजती' त्यादिविधिवाक्यपाठक्रमादेव समिदादियागानुष्ठानक्रमः । 'अग्निहोत्रं जुहोति' 'यवागूम्पचती' त्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमस्य कर्तुमशक्यत्वात् पाठक्रमं त्यक्त्वा अर्थक्रमः स्वीकर्तव्यः । अर्थः प्रयोजनं होमरूपं । तदर्थं क्रमोऽर्थक्रमः । तेन पूर्वं पाकः पश्चाद्धोमः । तथा 'सप्तदशप्राजापत्यान् पशूनालभेते' त्यत्र सप्तदशपशुद्रव्यकप्रजापतिदेवताकसप्तदशयागाः कर्तव्यत्वेन बोधिताः । तत्रोपाकर-

---

पाठात् क्रममाह । **समिध इति** ॥ अयं द्विविधः मन्त्रपाठब्राह्मणपाठभेदात् । उदाहृतो द्वितीयः । आग्नेयाग्नीषोमीययोः क्रमस्तत्साधनीभूतयाज्यानुवाक्यारूपमन्त्रपाठक्रमेणेति तत्र मन्त्रपाठात् क्रम इति ध्येयम् ॥ अस्य मूलेऽर्थक्रमानन्तरमभिधानेऽपि शब्दत्वसामान्यात् श्रुत्यनन्तरमत्रोक्तिरिति भाति ॥ आर्थं क्रममाह । **अग्नीति** ॥ अर्थक्रमपदं विगृह्य व्युत्पादयति । **अर्थ इति** ॥ अर्थपदव्याख्यानं **प्रयोजनमिति** । प्रकृतप्रयोजनोक्तिर्**होमरूपमिति** ॥ अर्थाय क्रम इति विग्रहवाक्यस्थचतुर्थ्यर्थकथनन्**तदर्थमिति** ॥ 'तदधीन'इतिपाठक्रमस्साधीयान् ॥ सूत्रकृता पाठक्रमानन्तरन्निरूपितं प्रवृत्तिक्रममाह । **तथेति** ॥ **सप्तदशयागा इति** ॥ नचात्र सप्तदशपशुद्रव्यक एकएव याग इति संशयितव्यम् । पशूनां प्रजापतिदेवतासम्बन्धोत्तरन्तत्र सप्तदशत्वसंख्यान्वयेन तावद्द्रव्यदेवतासम्बन्धानुमितताबद्यागविधानस्यावश्यकत्वात् । अन्यथा पश्वेकताप्रापकातिदेशबाधापत्तेश्चेति ॥ **तत्रोपेति** ॥ आहवनीयस्य पुरस्तात्प्रत्यङ्मुखमवस्थितस्य पशोर्बर्हिर्भ्यां प्लक्षशाखया

Digitization by Arya Samaj Charitable Foundation, Chennai

णाख्य आद्यः पदार्थो यतः कुतश्चिदारभ्य यत्र क्वचित् पशौ समापनीयः । नियोजनादिकन्तु येन क्रमेणोपाकरणं प्रवृत्तं तेनैव क्रमेण कर्तव्यम् । कथं । प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षण एव नियोजनं तृतीयक्षण एव प्रोक्षणम् । व्यवधानप्रयोजकाभावात् । अत्र तु सप्तदश-पशूनां सहानुष्ठेयत्ववचनात् प्रथमतो यत्र क्वचित् पशौ कृतमुपाकरणं स्वाश्रयकर्तव्यनियोजनाय षोडशभिः क्षणैर्व्यवधानं सहते न त्वधिकैः । तत्रोपाकरणक्रमेण नियोजनं प्रथमपशावकृत्वा पश्वन्तरेषु नियोजनं कृत्वाऽनन्तरं प्रथमपशौ नियोजनकरणे षोडशक्षणाधिकक्षणव्यवधानं शास्त्राननुमतमापद्यते । तन्निरासायोपाकरणं येन क्रमेण प्रवृत्तं तेनैव क्रमेण नियोजनादिकं कार्यमिति प्रवृत्तिक्रमः । तथा ज्योतिष्टोमे औपवसथ्यमहरारभ्य क्रमेणानुष्ठेयानामग्नीषोमीयसवनीयानुबन्ध्यानां पशूनां त्रयाणां साद्यस्काख्ये सोमयागे 'सह पशूनालभेत'

चोपस्पर्शनपूर्वकं देवतार्थत्वेन सङ्कल्पनमुपाकरणम् ॥ स्वेति ॥ स्वस्य उपाकरणस्य आश्रये प्रथममुपाकृते पशौ कर्तव्यं यन्नियोजनन्तस्मा इत्यर्थः ॥ उपाकरणनियोजनयोः षोडशक्षणाधिककालव्यवधाने शास्त्रप्रकोपः स्यादित्याह । तत्रेति ॥ अननुमतमिति ॥ प्रयोगविधिप्रमितस्यांगप्रधानसाहित्यस्यैककालिकत्वरूपत्वादनेकेषाञ्चैकस्मिन्काले-ऽनुष्ठातुमशक्यत्वात् 'आख्यातानामर्थं ब्रुवतां शक्तिस्सहकारिणी' ति न्यायेन यावताऽनुष्ठानं सम्भवति तावदेवानुमन्यते स विधिर्नातोऽधिकमिति भावः ॥ स्थानात्क्रममाह । तथेति ॥ सोमयाग इति ॥

Digitization by Arya Samaj Foundation Chennai and eGangotri

इत्येकदाऽनुष्ठानलक्षणं साहित्यं बोधितं । तदपि सवनीयस्य स्थाने विहितं । तत्र प्राकृतक्रमं परित्यज्य सवनीयस्य स्थाने साहित्यविधानादादौ सवनीयपशोरुपाकरणं ततोऽग्नीषोमीयस्य ततोऽनुबन्ध्यायाः इति स्थानात् क्रमः । सुत्यादिवसात् पूर्वमहरौपवसथ्यम् । तथा दर्शे सान्नाय्यधर्माणां शाखाच्छेद-

---

अव्यक्तत्वरूपसादृश्यकल्पितेनातिदेशेन प्राप्तानामिति शेषः ॥ **एकदेति** ॥ **एकदा** एककालिकं यदनुष्ठानं तद्रूपमित्यर्थः ॥ **तदिति** ॥ तदपि साहित्यमपि ॥ विहितं साहित्यमपि सवनीयस्य स्थाने भवतीत्यन्वयः । ज्योतिष्टोमे प्रधानदिने 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोती'ति आश्विनग्रहग्रहणोत्तरकाले सवनीयः पशुर्विहितः । एतत्पूर्वदिने औपवसथ्ये दैक्षः पशुः । सवनीयोत्तरकालेचानूबन्ध्यः । साद्यस्क्रस्यचैकदिनसाध्यत्वात्तत्र पशूनां विधीयमानं साहित्यं तद्दिनकर्तव्यस्य सवनीयपशोर्यत्स्थानन्तत्रैव भवतीत्यर्थः ॥ **प्राकृतेति** ॥ प्रथममौपवसथ्यः । अथ सवनीयः । अथानूबन्ध्य इति क्रममित्यर्थः ॥ **विधानादिति** ॥ अवगमादित्यर्थः ॥ विहितस्य साहित्यस्य सवनीयस्थानकत्वादित्यत्र तु तात्पर्यम् ॥ आश्विनग्रहग्रहणोत्तरकालरूपं हि सवनीयपशोः स्थानं तद्ग्रहणे वृत्ते सवनीयमेवोपस्थापयतीति तस्यैवानुष्ठानमुचितमिति भावः ॥ **तत इति** ॥ नन्वेतत्क्रमे किं विनिगमकमिति चेन्न । बाधकाभावे प्राकृतक्रमस्यैव नियामकत्वात् ॥ **सुत्येति** ॥ प्रधानहविस्सोमरसरूपं सुत्या ॥ अथाद्य मुख्यक्रममाह । **तथेति** ॥ **शाखेति** ॥ गोभ्यो वत्सानां पृथक्करणरूपापाकरणोपयुक्तायाश्शाखायाः 'शाखामाच्छिनत्ती'ति विहितं

Digitization by Arya Samaj Charitable Foundation, Chennai

नादीनां पूर्वमाग्नेयधर्माणां निर्वापादीनाञ्च अनन्तरं प्रवृत्तावपि मुख्ययोराग्नेययागसान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययागक्रमेणादावाग्नेयपुरोडाशस्य प्रयाजशेषाभिघारणं ततः पयसोऽभिघारणमिति मुख्ययागक्रमादभिघारणक्रमः । इत्येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमैरेव कर्मानुष्ठा-

---

छेदनं शाखाच्छेदनम् ॥ **निरिति** ॥ पुरोडाशोपयुक्तानां व्रीहीणां मुष्टिना पृथक्कृत्योपादानन्निर्वापः ॥ **प्रवृत्तावपीति** ॥ एतेन मुख्यक्रमाभावे प्रवृत्तिक्रमेण प्रथमं सान्नाय्यपयसोऽभिघारणम् । अनन्तरन्त्वाग्नेयपुरोडाशस्येति स्यादिति मुख्यस्य क्रमनियामकत्वविशदीकारपुरस्सरं प्रवृत्तिक्रममुख्यक्रमयोर्विरोधे मुख्यक्रमः प्रबल इति सूचितम् ॥ एवं श्रुत्यर्थपठनस्थानमुख्येषु अनेकसमवाये पारदौर्बल्यमिति विस्तरोऽन्यत्र ॥ उपक्षिप्ताक्षेपसमाधानरूपेण प्रतिपादितं पञ्चमाध्यायार्थमुपसंहरति । **इत्येवमिति** ॥ ननु श्रौत एव एकः क्रम आदर्तव्यः । श्रुतिप्रमाणकत्वात् । नान्ये, अतथात्वात् । 'योह्यर्थादर्थो न स चोदनार्थ' इति हि भाषितम् । नैवम् । अनुष्ठेयानामर्थानां साहित्यावगतौ एकक्षणवृत्तित्वरूपे तस्मिन्नसम्भवति आवश्यके पूर्वापरीभावे कतमः पूर्वः कतमोऽपर इति येयमाकाङ्क्षोदेति तामेतां शमयन्ती यथा श्रुतिः क्रमनियामिका तथाऽर्थपाठादयोऽपीति सर्वः क्रमस्समानमादरमर्हति । यत्र तु नैव काचिदाकांक्षा श्रुतस्यार्थस्य, अर्थाच्च कश्चिदुदासीनोऽर्थः प्रतीयते तद्विषयमिदं 'योह्यर्थादर्थ' इतीति । तदिदं सर्वमभिसन्धायाह । **अन्यथाऽनुष्ठाने वैगुण्यमिति** ॥ एवं पञ्चानामध्यायानामर्थस्संगृह्य प्रत्यपादि । षष्ठार्थस्तु प्रयोगविध्यादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

नम् । अन्यथाऽनुष्ठाने वैगुण्यमित्यलम् ।

इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा समाप्ता ॥

निरूपणावसरे फलवाक्योदाहरणेनैवोक्तप्रायः । फलसमानाधिकरण-कर्तृत्वरूपोह्यधिकारः फलवाक्येनैव बोध्यते । अत एव 'फलसम्बन्ध-बोधको विधिरधिकारविधि' रिति वदन्ति । एतावता उपदेशातिदेश-भेदेन द्विविधे द्वादशलक्षण्यर्थे उपदेशरूपोऽसौ पूर्वषट्कार्थो बालव्यु-त्पत्तिसम्पत्त्यनुगुणं निरूपितो भवति । एतदध्ययनसम्पन्नव्युत्पत्ति-भिस्तु अतिदेशसमाचारोऽन्यतोऽधिगन्तव्य इत्युपरम्यत इत्याशयान आह । अलमिति ॥

अत्रैता मूलोक्तार्थानां संग्रहकारिकाः—

महर्षिजैमिनिप्रोक्तद्वादशाध्यायगोचरौ ।
धर्माधर्मौ तयोस्त्रेधा प्रमाणं परिदर्शितम् ॥

तत्रादिमा श्रुतिर्द्वेधा मन्त्रब्राह्मणभेदतः ।
विध्यर्थवादभेदेन ब्राह्मणं द्विविधं मतम् ॥

गुणकर्मोभयफलसम्बन्धविधिभेदतः ।
विधिवाक्यविवेकोऽथ प्रयोगविधिरीरितः ॥

अपूर्वकल्पनारीतिरपूर्वादिविधित्रयम् ।
अथाङ्गत्वे प्रमाणानि तार्तीयानि प्रसङ्गतः ॥

द्विधाऽङ्गसंविभागोऽथ गुणकर्मार्थकर्म च ।
आदिमन्द्विविधन्तत्र प्रतिपत्तिस्तथेतरत् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

पुनश्चतुर्धाचोत्पत्तिराप्तिर्विकृतिसंस्कृती ।
त्रेधा स्यादर्थकर्मापि नित्यनैमित्तकैच्छिकम् ।

उक्तेषु विधिवाक्येषु तदर्थस्तदनूच्यते ।
आर्थी शाब्दीति विधिषु भावना द्विविधोदिता ॥

स्वाध्यायविधिवाक्येतु शाब्द्याः कर्तव्यतोच्यते ।
अथनामसमाचारस्तत्प्रख्यादिप्रमाणकः ।

तत्प्रसङ्गाद्ग्रहैकत्वारुणाधिकरणक्रमः ।
अर्थवादस्ततो मन्त्रः परिसंख्यात्रिदोषता ॥

विकल्पस्याष्टदोषत्वं कार्यैक्याद्वचनाच्च सः ।
व्यवस्थितः क्वचित्सोऽयमिति वेदप्रमाणता ॥

स्मृत्याचारावथो कर्मभेदश्शब्दान्तरात्तथा ।
अभ्याससङ्ख्यासंज्ञाभिः गुणात्प्रकरणान्तरात् ॥

क्रत्वर्थश्च पुमर्थश्चोभयार्थश्चेत्यथावदत् ।
वेदस्यार्थं संविभज्य प्रयोक्तृत्वाप्रयोक्तृते ॥

अथ श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिभिः ।
अनुष्ठेयपदार्थानां क्रमः स्फुटमुदीरितः ॥

मीमांसापरिभाषेयं प्रवृत्ता बालबोधने ।
उपदेशान्निरूप्यैवमत्रैव स्थातुमिच्छति ॥

केनापि कौतुकेनासौ तत्र व्यधित चापलम् ।
गुरवश्चेत्प्रसीदन्ति कृतार्थोऽस्मि कृतम्परैः ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

पेण्णोर्मिपवनपावितपरिसरमातस्थिवानसौ रङ्गम् ।
श्रीशैलस्तातार्यः परिष्करोतिस्म तन्त्रपरिभाषाम् ॥

टीकोपकारमनपेक्ष्य समस्तमर्थ-
मत्रावगन्तुमखिलाः प्रभवन्तु कामम् ॥
शास्त्रार्थलेखनविधौ गहने गभीरा
व्युत्पत्तिरस्ति तु फलं मम लेखनस्य ॥

इति
मीमांसापरिभाषापरिष्कारः ॥



Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai